अथ

# ॥ नवग्रहजप षडङ्गरुद्री ॥

## (बुढ़ी रुद्री)

प्रकाशक :

बाबू माधवप्रसाद शर्मा

के. २३/११९, दूधविनायक, वाराणसी - २२१००१; पो.बॉ.क्र.१००६

अथ

# ॥ नवग्रहजप षडङ्गरुद्री ॥

## (बुढ़ी रुद्री)


सम्पादकः संशोधकश्च

**डॉ. पतञ्जलिमिश्रः**

वरिष्ठव्याख्याता, संस्कृतविद्या-धर्मविज्ञान-सङ्कायीय वेदविभागे,

का. हि. वि. वि., वाराणसी-५



**बाबू माधवप्रसाद शर्मा**

के.२३/११९, दूधविनायक, वाराणसी - २२१००१; पो.बॉ.क्र.१००६

प्रकाशक :

सागर शर्मा

मे. बाबू माधवप्रसाद शर्माको लागि

के. २३/११९, दूधविनायक

वाराणसी- २२१००१

नवीन संस्करण, सं. २०७०

सर्वाधिकार©प्रकाशकाधीन। यस पुस्तकलाई पूर्ण वा आंशिक रूपमा प्रकाशकको पूर्व अनुमति बिना कुनै प्रकारले उपयोगमा ल्याउन सकिने छैन। यसो गरेमा कॉपीराइट ऐन बमोजिम कार्यवाही हुनेछ।

मूल्य : भा.रु.८०.००

मुद्रक :

महावीर प्रेस

वाराणसी

# विषय-सूची


| विषय | पृष्ठम् |
|---|---|
| ग्रहाणां दानपदार्थाः जपसङ्ख्याश्च | ii |
| योगिनी नाममन्त्राः | iii |
| नवग्रहचक्र | iv |
| प्रयोगविधिः | १ |
| स्वस्तिवाचनम् | २ |
| कर्मपात्रम् | ३ |
| प्रायश्चित्तगोदानम् | ४ |
| प्रतिज्ञासङ्कल्पः | ५ |
| दिग्बधनम् | ७ |
| ब्राह्मणवरणम् | ८ |
| पुण्याहवाचनम् | ८ |
| दीपपूजनम् | १२ |
| कलशपूजनम् | १३ |
| गणेशपूजनम् | १८ |
| रक्षा-विधानपूजनम् | २५ |
| शिवपूजाविधिः | २७ |
| नवग्रहस्थापन-पूजनविधिः | ३५ |
| षडङ्गन्यासः | ४१ |
| पाठक्रमः | |
| गणपतिसूक्तम् | ४४ |
| सूर्य जपः | ४९ |
| चन्द्र जपः | ५५ |
| भौम जपः | ६१ |
| बुध जपः | ७१ |
| गुरु जपः | ७८ |
| शुक्र जपः | ८५ |
| शनि जपः | ९० |
| राहु जपः | १०४ |
| केतु जपः | ११२ |
| रुद्राभिषेकः | ११६ |
| शान्तिपाठः | १४३ |
| नवग्रहवैदिकमन्त्राणि | १५५ |
| वेदाध्यायानामाद्यन्तमन्त्राः | १५८ |
| उत्तराङ्गविधिः | |
| आरार्तिक्यम् | १९१ |
| प्रदक्षिणा, पुष्पाञ्जलिः | १९१ |
| बलिदानम् | १९५ |
| गोदानविधिः | १९६ |
| क्षमापनम् | २०२ |
| अभिषेकः | २०३ |
| दध्यक्षताभिमन्त्रणम् | २०६ |
| तिलकम् | २०७ |
| समर्पणम् | २०७ |

## गोचराद्यर्थ ग्रहकृतानिष्टफलस्य शमनार्थं प्रत्येकग्रहाणां जप-दान पदार्थाः

| सूर्यदानम् | चन्द्रदानम् | भौमदानम् | बुधदानम् | गुरुदानम् | शुक्रदानम् | शनिदानम् | राहुदानम् | केतुदानम् |
|---|---|---|---|---|---|---|---|---|
| माणिक्य | वंशपात्र | विद्रुम पृथ्वी | कांस्यपात्र | पीतधान्य | श्वेतचामल | नीलम, तिल | सप्तधान्य | माषान्न |
| गोधूमान्न, गुड | श्वेतचामल | मसूरादिद्विदल | हरितवस्त्र | पीतवस्त्र, सुन | श्वेतचन्दन | मसूर, तैल | माषान्न, हेम | काम्लो, कस्तू. |
| सवत्सा-गौ | श्वेतवस्त्र | गोधूमान्न | गजदन्त, घृत | घृतपात्र, पुष्प | श्वेत चित्रवस्त्र | कृष्णवस्त्र | नीलवस्त्र, गौ | वैदूर्यमणि |
| कमलपुष्प | श्वेतचन्दन | रक्तवृषभ | मुद्गान्न | पीतफल | श्वेतपुष्प | गहत, लोहा | कृष्णपुष्प | कृष्णपुष्प |
| नूतनगृह | श्वेतपुष्प | गुड, रक्तचन्दन | सुवर्ण, दासी | पुखराज | रजत, हीरक | महिषी | खड्ग, तिल | तिलतैल |
| रक्तवस्त्र | चीनी, चाँदी | रक्तवस्त्र | सर्वपुष्प, पन्ना | हरिद्रा, अश्व | घृत, सुवर्ण | कृष्णधेनु | तेल, लोहा | रत्न, सुवर्ण |
| रक्तचन्दन | वृषभ, घृत | रक्तपुष्प | कर्पूर, शस्त्र | पुस्तक, मधु | श्वेताश्व, दधि | कृष्णपुष्प | सूपो, काम्लो | लोहा, बोको |
| सुवर्ण, ताम्र | शङ्ख, दधि | सुवर्ण, ताम्र | अनेक फल | लवण, शर्करा | सुगन्धद्रव्य | उपानह | सतिलताम्रपात्र | शस्त्र |
| केसर, मूँगा | मोति, कर्पूर | केसर, कस्तू. | षड्रस-भोजन | भूमि, छत्र | शर्करा, गो, भूमि | कस्तूरी, सुवर्ण | सुवर्ण, गोमेद | सप्तधान्य |
| वर्ण दक्षिणा | वर्ण दक्षिणा | वर्ण दक्षिणा | वर्ण दक्षिणा | वर्ण दक्षिणा | वर्ण दक्षिणा | वर्ण दक्षिणा | वर्ण दक्षिणा | वर्ण दक्षिणा |
| [1]जप संख्या | जप संख्या | जप संख्या | जप संख्या | जप संख्या | जप संख्या | जप संख्या | जप संख्या | जप संख्या |
| ७००० | ११००० | १०००० | ८००० | १९००० | १५००० | २३००० | १८००० | १८००० |

१. कलियुगे चतुर्गुणौ ( कलियुगमा जपसंख्यालाई चौगुना पारी जप्नू पर्छ भन्ने भनाई छ ) ।

# योगिनीदशाकृतारिष्टशमनाय जपार्थं मङ्गलादीनां तान्त्रिक मन्त्राः

मङ्गला–

ॐ ह्री मङ्गले मङ्गलायै स्वाहा ।

धान्या–

ॐ श्री धनदे धान्यै स्वाहा ।

भद्रिका–

ॐ भद्रिके भद्रं देहि अभद्रं नाशय स्वाहा ।

सिद्धा–

ॐ ह्री सिद्धे मे सर्व मानं साधय स्वाहा ।

पिङ्गला–

ॐ ग्लौं पिङ्गले वैरिकारिणि प्रसीद फट् स्वाहा ।

भ्रामरी–

ॐ भ्रामरी जगतामधीश्वरी भ्रामरी क्लीं स्वाहा ।

उल्का–


ॐ उल्के मम रोगं नाश जृम्भय स्वाहा ।

सङ्कटा–

ॐ ह्रीं सङ्कटे मम रोगं नाशय स्वाहा ।

ग्रहाणां होमार्थं समिधः

अर्कः पलाश खदिरस्त्वपामार्गोऽथ पिप्पलः ।
औदुम्बरशमीदूर्वाः कुशाश्च समिधः क्रमात् ॥




## ग्रहादिको स्थान र आकृति

मध्ये तु भास्करं विद्यात् शशिनं पूर्व-दक्षिणे । दक्षिणे लोहितं विद्यात् बुधं पूर्वोत्तरेण तु ॥
उत्तरेण गुरुं विद्यात् पूर्वेणैव तु भार्गवम् । पश्चिमेन शनिं विद्यात्राहुं पश्चिम-दक्षिणे ॥
पश्चिमोत्तरयो: केतु: स्थाप्योवै शुक्लतण्डुलः । वर्तुलं भास्करं विद्यादर्द्धचन्द्रं निशाकरम् ॥
अङ्गारकं त्रिकोणं च बुधं च धनुराकृतिम् । पद्माकृतिं गुरुंविद्यात् चतुष्कोणंचभार्गवम् ॥
पुरुषाकृतिं शनिं विद्यात् राहुं च मकराकृतिम् । खड्गाकृतिन् हि केतूंश्च इत्येवं ग्रहमूर्तयः ॥

नोट :

नवग्रहका आकृति(चित्र)हरूको विषयमा विभिन्न मतहरू पाइन्छन्। यहाँ दिइएका आकृतिहरू मात्र नै प्रामाणिक हुन् र अरू सबै मतका आकृतिहरू गलत हुन् भनेर हामीले दावा गरेको होइन भन्ने कुरा यहाँहरूले बुझ्नु नै हुने छ ।

ग्रहहरूका जुन-जुन वर्ण उल्लेख गरिएका छन् ती-ती वर्णका अक्षता बनाई ती अक्षतासहित अन्य यथामिलितोपचारले पूजा गरिसकेपछि वेदीको पश्चिम भागमा प्रत्येक ग्रहका निमित्त दुना-दुनामा सकभर ग्रहहरूलाई मन पर्ने अन्न, बलि र सोको अभावमा **'एष दध्यक्षता बलिर्नमः'** भनेर दही अक्षता अर्पण गरी प्रार्थना गर्नु :

**ग्रहनक्षत्रजा पीडाः तस्कराग्नि समुद्भवाः ।**
**ताः सर्वाः प्रसमं यान्तु प्रसीदन्तु नवग्रहाः ।।**

# नवग्रहजपषडङ्गविधिप्रयोगः

## कर्मपात्रम्

कृतमाङ्गलिक स्नानः, कृतनित्यक्रियः, कृततिलकः, बद्धशिखः नद्याः तटे, शिवमन्दिरे गृहे वा प्रागग्रे शुभासने प्राङ्मुखम् उपविश्य; आचमनम्— ॐ केशवाय नमः, ॐ नारायणाय नमः, ॐ माधवाय नमः; हस्तप्रक्षालनम्- ॐ गोविन्दाय नमः ।

विष्णोर्नामानि- ॐ विष्णवे नमः। ॐ मधुसूदनाय नमः। ॐ त्रिविक्रमाय नमः। ॐ वामनाय नमः। ॐ श्रीधराय नमः। ॐ हृषीकेशाय नमः। ॐ पद्मनाभाय नमः। ॐ दामोदराय नमः। ॐ सङ्कर्षणाय नमः। ॐ वासुदेवाय नमः। ॐ प्रद्युम्नाय नमः। ॐ अनिरुद्धाय नमः। ॐ पुरुषोत्तमाय नमः। ॐ अधोक्षजाय नमः। ॐ नारसिंहाय नमः। ॐ अच्युताय नमः। ॐ जनार्दनाय नमः। ॐ उपेन्द्राय नमः। ॐ हरये नमः। ॐ श्रीकृष्णपरमात्मने नमः।

भूतशुद्धिः —विनियोगः - अपवित्रः पवित्रोवा-इत्यस्य वामदेव ऋषिः विष्णुर्देवता अनुष्टुप्छन्दः हृदि पवित्रकरणे विनियोगः ॥

मन्त्रः - ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपिवा ।
यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ पुण्डरीकाक्षः पुनातु, पुण्डरीकाक्षः पुनातु, पुण्डरीकाक्षः पुनातु ॥ इति आत्मानं पूजासामग्रीं च सम्प्रोक्ष्य ।

**आसनशुद्धिः** — विनियोगः - ॐ पृथ्वीतिमन्त्रस्य मेरुपृष्ठऋषिः सुतलं छन्दः कूर्मो देवता आसने विनियोगः ।

मन्त्रः - ॐ पृथ्वि ! त्वयाधृता लोका देवि ! त्वं विष्णुना धृता ।
त्वं च धारय मां देवि ! पवित्रं कुरुचासनम् ॥

**प्राणायामः** —

विनियोगः - ॐ प्रणवस्य परब्रह्मऋषिः परमात्मा देवता दैवी गायत्री छन्दः प्राणायामे विनियोगः ।

मन्त्रः - ॐ भूः ॐ भुवः ॐ स्वः ॐ महः ॐ जनः ॐ तपः ॐ सत्यम् ॐ तत्त्सवितुर्व्वरेण्ण्यं भर्ग्गोदेवस्यधीमहि । धियोयोनःप्प्रचोदयात् ॥ ॐ आपो ज्योतीरसोमृतं ब्रह्म भूर्भुवः स्वरोम् ।

**शिखाबन्धनम्**—चिद्रूपिणी महामाये दिव्यतेज समन्विते। तिष्ठ देवि शिखामध्ये तेजोवृद्धिं कुरुष्व मे ॥

**भैरवप्रार्थना**—तीक्ष्णदंष्ट्र ! महाकाय ! कल्पान्तदहनोपम ! । भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि ॥

**दिग्बन्धनम्**—अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः
ये भूता विघ्नकर्त्तारस्ते नश्यन्तु शिवाज्ञया ।
अपक्रामन्तु भूतानि पिशाचाः सर्वतो दिशम्
सर्वेषामविरोधेन ब्रह्मकर्म समारभेत् ॥

**इष्टदेवतानां नमस्कारः**—श्रीमन्महागणाधिपतये नमः, इष्टदेवताभ्यो नमः, ग्रामदेवताभ्यो नमः, कुलदेवताभ्यो नमः, उमामहेश्वराभ्यां नमः, सर्वेभ्यो देवेभ्यो नमः, सर्वेभ्यो ब्राह्मणेभ्यो नमः, निर्विघ्नमस्तु ।

ॐ सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥
विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान्। सरस्वतीं प्रणम्यादौ सर्वकार्यार्थसिद्धये ॥
स्वस्तिन॒ऽइन्द्रो॑वृ॒द्धश्र॑वाः स्व॒स्तिनः॑पू॒षावि॒श्ववे॑दाः ॥ स्व॒स्तिन॒स्तार्क्ष्यो॒ऽअरि॑ष्टनेमिः स्व॒स्ति
नो॒बृह॒स्पति॑र्दधातु ॥

कर्मपात्रं पुष्पाक्षतोपरि स्थापयेत्— ॐ यद्देवादेवहेडनन्देवासश्चकृमावयम्। अग्निर्म्मातस्म्मादेनसोविश्श्वान्म्मुञ्चत्त्वꣳहंसः॥ ॐ यदिदिवायदिनक्तमेनाꣳसिचकृमावयम्॥ वायुर्म्मातस्म्मादेनसोविश्श्वान्म्मुञ्चत्त्वꣳहंसः॥ ॐ यदिजाग्ग्रद्यदिस्वप्नऽएनाꣳसिचकृमावयम्॥ सूर्य्योमातस्म्मादेनसोविश्श्वान्म्मुञ्चत्त्वꣳहंसः ॥

तत्र पवित्रकुशान् क्षिपेत्– ॐ पवित्त्रेस्त्थोवैष्ष्णव्व्यौसवितुर्व्वः प्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेणपवित्त्रेण सूर्य्यस्यरश्मिभिः॥ देवीरापोऽअग्ग्रेगुवोऽअग्ग्रेपुवोग्ग्रऽइममद्ध्ययज्ञन्नयताग्ग्रेयज्ञपतिꣳसुधातुंय्यज्ञपतिन्देवयुवम् ॥

जलम्– ॐ शन्नोदेवीरभिष्ट्टयऽआपोभवन्तुपीतये॥ शंय्योरभिस्रवन्तुनः॥

चन्दनम्– ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

यवान्– यवोसियवयास्म्मद्द्वेषोयवयारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्व्यैत्त्वाशुन्धन्ताँल्लोकाःपितृषदनाःपितृषदनमसि ॥

तिलान्– ॐ तिलोसि सोमदैवत्यो गोसवो देवनिर्मितः। प्प्रत्क्नमद्भिः पृक्तः स्वधयापितृँल्लोकान्प्प्रीणाहिनः स्वाहा ॥

अक्षतान्– ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत॥ अस्तोषतस्वभानवोव्विप्प्रानविष्ठयामतीयो जान्विन्द्रतेहरी ॥

पुष्पाणि– ॐ श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्यात्तम्॥ इष्णन्निषाणामुम्मऽइषाणसर्वलोकम्मऽइषाण॥

पुनः सर्वतः त्रिभिः कुशैः सेचनम्–

ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा ।

यः स्मरेत् पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ ॐ पुण्डरीकाक्षः पुनातु–३ ।

प्रायश्चित्त गोदानम्— देयद्रव्याय नमः। हरिः ॐ तत्सत्–३ विष्णुः–३ अद्येह अहं मम श्रुति-स्मृति पुराणोक्तफलप्राप्त्यर्थं देहशुद्ध्यर्थं इमां गां रुद्रदैवतां तत्प्रत्याम्नायीभूतां अमुकद्रव्यं अमुकदैवताकं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे।

प्रार्थना– नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च ।नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

गावो मे अग्रतः सन्तु गावो मे सन्तु पृष्ठतः ।गावो मे हृदये सन्तु गवां मध्ये वसाम्यहम् ॥

दानप्रतिष्ठा- अद्य कृतैतत् गोदानप्रतिष्ठासाङ्गतासिद्ध्यर्थं अमुकद्रव्यं अमुकगोत्राय अमुकशर्मणे ब्राह्मणाय तुभ्यमहं सम्प्रददे ।

प्रतिज्ञासङ्कल्पः —हरिः ॐ तत्सत्-३ ॐ विष्णुः-३ अद्य श्रीमद्भगवतो महापुरुषस्य विष्णोराज्ञया प्रवर्तमानस्य सकलजगत् सृष्टिकारिणो ब्रह्मणो द्वितीयपरार्द्धे श्रीश्वेतवाराहकल्पे वैवस्वत मन्वन्तरे अष्टाविंशतितमे युगे प्रह्लादाधिपत्ये मनौ सप्तमे सत्यत्रेताद्वापरान्ते कलियुगे कलियुगस्य प्रथमचरणे जम्बूद्वीपे भारतवर्षे भरतखण्डे आर्यावर्तान्तर्गते अमुकदेशे अमुकग्रामे अमुकनदीतीर्थादिसन्निधौ अमुकस्थाने इह पुण्यभूमौ बौद्धावतारे अमुकश्रीशालिवाहनशाके षष्ठिसंवत्सराणां मध्ये अमुकनाम संवत्सरे श्रीसूर्ये अमुकायनगते अमुक-ऋतौ मासानामुत्तमे अमुकमासे अमुकपक्षे अमुकतिथौ अमुकवासरान्वितायां यथानाम नक्षत्र-योग-लग्न-करण-मुहूर्तान्वितायां अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते चन्द्रमसि अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथास्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषेण विशिष्टायां शुभपुण्यतिथौ अद्येह अमुकगोत्रः अमुकप्रवरः अमुकनामा अहं मम सपरिवारस्य सकुटुम्बस्यायुरारोग्यैश्वर्योत्तरोत्तर-हर्ष-विजयोदयपूर्वक-दारिद्र्य-दुःख-दुर्भिक्ष-दौर्मनस्य-

दौर्भाग्योपसर्ग-महामारीत्रासोल्कापात-निर्घातभूकम्पादि सूचितदोषोपशान्त्यर्थं बाह्याभ्यन्तर-ज्वरातिसारापस्मारश्वासकासादि समस्तरोगाणां झटिति निवृत्तिपूर्वकमारोग्यावाप्तये श्रुति-स्मृतिपुराणोक्तफलप्राप्त्यर्थं धर्मार्थकाममोक्षसिद्धिद्वारा सर्वव्याधिनिरसनपूर्वकं सर्वाभीष्ट-कामनासिद्ध्यर्थं विविधतापोपशमनार्थं च मम जन्मराशेः सकाशाद्विरुद्धचतुर्थाष्टमद्वादशादि-स्थानस्थितानां अमुकग्रहपीडा-परिहारद्वारा एकादशस्थानस्थितवदुत्तमफलप्राप्त्यर्थं नवग्रह-भवानीशङ्करदेवतानुकूलतासिद्ध्यर्थं यथाज्ञानेन यथामिलितोपचारैः दीप-कलश-गणेश-पूजनपूर्वकं ( सकृत् रुद्रावर्तनेनाभिषेकपूर्वकं ) पूजनमहं करिष्ये ।

पुनः दिग्बन्धनम्—वामहस्ते गौरसर्षपान् अक्षतान् गृहीत्वा सर्वदिक्षु विकिरेत् ।

ॐ रक्षोहाविश्वचर्षणिरभियोनिमयोहते । द्रोणेसधस्थमासदत् ॥

ॐ अपसर्पन्तु ते भूता ये भूता भूमिसंस्थिताः । ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया ॥

भूतानि राक्षसा वापि यत्र तिष्ठन्ति केचन । ते सर्वेऽप्यपगच्छन्तु शुभकार्यं करोम्यहम् ॥

पूर्वस्यां पुण्डरीकाक्षः आग्नेय्यां श्रीधरस्तथा । दक्षिणे नरसिंहश्च नैर्ऋत्यां पातु माधवः ॥

पुरुषोत्तमो मे वारुण्यां वायव्यां च जनार्दनः । गदाधरस्तु कौबेर्य्यामीशान्यां पातु केशवः ॥

आकाशे च गदा पातु पाताले च सुदर्शनः ॥

ऋग्वेदादि पूजनम्, प्रदक्षिणाक्रमेण- हस्ते गन्धपुष्पाक्षतान् गृहीत्वा पूर्वे- ॐ ऋग्वेदाय नमः; दक्षिणे- ॐ यजुर्वेदाय नमः; पश्चिमे- ॐ सामवेदाय नमः; उत्तरे- ॐ अथर्ववेदाय नमः ।

ब्राह्मणवरणम्—हरिः ॐ तत्सत् -३ ॐ विष्णुः-३ अद्येह पूर्वसङ्कल्पसिद्धिरस्तु अमुककार्य सिद्ध्यर्थं तथास्मिन् कर्मणि परमेश्वरप्रीतिद्वारा सर्वाभ्युदयावाप्तये पुण्याहवाचनं च कर्तुं अमुकगोत्रं ( गोत्रान् वा ) ब्राह्मणं ( ब्राह्मणान् वा ) एभिश्चन्दन-पुष्पाक्षत-पूगीफल-वासोद्रव्यादिभिरहं वृणे; वृणोऽहं ( वृताः स्मः वा ) इति प्रतिवचनम् । यथा विहितं कर्म कुरु ( कुरुत वा ), करवाणि ( करवाम वा ) इति प्रतिवचनम् ।

प्रार्थना- श्रोत्रियाः सत्यवाचश्च वेदध्यानरताः सदा । यद्वाक्यामृतसंसिक्ता ऋद्धिं यान्ति नरद्रुमाः ॥

पुण्याहवाचनम्— गन्धपुष्पाक्षतताम्बूलपूगीफलद्रव्यवस्त्रादिभिस्त्रींश्चतुरः पञ्च वा ब्राह्मणान् सम्पूज्य; हस्ते फलादिकं गृहीत्वा- हरिः ॐ तत्सत् -३ ॐ विष्णुः-३ अद्येहाऽमुक गोत्रोऽमुकप्रवरो ऽमुकनामाहं ममामुककर्मणि पुण्याहवाचनार्थं नानानाम गोत्रान् नाना नामशर्मणो ब्राह्मणान् एभिश्चन्दनपुष्पाक्षतपूगीफलवासोद्रव्यादिभिर्युष्मान् वृणे ।

यजमान- हरिः ॐ तत्सत् -३ ॐ विष्णुः-३ ॐ अद्येह ( देशकालौ स्मृत्वा ) अमुकगोत्रस्य अमुकनाम्नः मम अमुककर्मणि भो ब्राह्मणाः पुण्याहं भवन्तो ब्रुवन्तु, पुण्याहं भवन्तो ब्रुवन्तु, पुण्याहं भवन्तो ब्रुवन्तु ।

ब्राह्मं पुण्यं महर्य्यञ्च सृष्टिस्थित्यन्तकारकम् । वेदवृक्षोद्भवं नित्यं तत् पुण्याहं ब्रुवन्तु मे ॥

ते च ( ब्राह्मणाः )- ॐ पुण्याहम् ॐ पुण्याहम् ॐ पुण्याहम् । ॐ पुनन्तुमादेवजनाः पुनन्तुमनसाधियः । पुनन्तुव्विश्श्वाभूतानिजातवेदःपुनीहिमा ॥

यजमान- ॐ अद्येह ( देशकालौ सङ्कीर्त्य ) मम अमुककर्मणि भो ब्राह्मणाः स्वस्ति भवन्तो ब्रुवन्तु, स्वस्ति भवन्तो ब्रुवन्तु, स्वस्ति भवन्तो ब्रुवन्तु ॥

स्वस्तिर्या अविनाशाख्या पुण्या कल्याणकृद्यतः । विनायकप्रिया नित्यं स्वस्तयस्ता भवन्तु मे ॥

ते च- ॐ स्वस्ति ॐ स्वस्ति ॐ स्वस्ति । ॐ स्वस्तिनऽइन्द्रोव्वृद्धश्श्रवाःस्वस्तिनःपूषाव्विश्श्ववेदाः ॥ स्वस्तिनस्ताक्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्प्पतिर्द्दधातु ॥

यजमान- ॐ अद्येह ( देशकालौ सङ्कीर्त्य ) मम अमुककर्मणि भो ब्राह्मणा ऋद्धिं भवन्तो ब्रुवन्तु,

ऋद्धिं भवन्तो ब्रुवन्तु, ऋद्धिं भवन्तो ब्रुवन्तु ॥

सागरस्य यथा ऋद्धिर्महालक्ष्मीर्विनिःसृता । सम्पूर्णा चैव मर्यादा देवा ऋद्धिं ब्रुवन्तु मे ॥

ते च– ॐ ऋद्ध्यताम् ॐ ऋद्ध्यताम् ॐ ऋद्ध्यताम् । ॐ सत्रस्य ऽऋद्धिरस्यगन्म ज्ज्योतिरमृताऽअभूम । दिवम्पृथिव्याऽअद्ध्यारुहामाविदामदेवान्त्स्वर्ज्ज्योतिः ॥

यजमान– ॐ अद्येह ( देशकालौ सङ्कीर्त्य ) मम अमुककर्मणि भो ब्राह्मणाः वृद्धिं भवन्तो ब्रुवन्तु, वृद्धिं भवन्तो ब्रुवन्तु, वृद्धिं भवन्तो ब्रुवन्तु ॥

विष्णुना चाभ्यनुज्ञाता देवजातिसमन्विता । हरन्ती सर्वपापानि वृद्धिर्भवतु सा मम ॥

ते च– ॐ वृद्ध्यताम् ॐ वृद्ध्यताम् ॐ वृद्ध्यताम् । ॐ ज्ज्यैष्ठ्यञ्च । मऽआधिपत्त्यञ्चमेमन्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमाचमेमहिमाचमेवरिमाचमेप्प्रथिमाचमेवर्षिमाचमेद्राघिमाचमेवृद्धञ्चमेवृद्धिश्चमेयज्ञेनकल्प्पन्ताम् ॥

यजमान– ॐ अद्येह ( देशकालौ सङ्कीर्त्य ) मम अमुककर्मणि भो ब्राह्मणाः कल्याणं भवन्तो ब्रुवन्तु, कल्याणं भवन्तो ब्रुवन्तु, कल्याणं भवन्तो ब्रुवन्तु ॥

पृथिव्यामुद्धृतायां तु यत् कल्याणं पुरा कृतम् । ऋषिभिर्देवगन्धर्वैस्तत् कल्याणं ब्रुवन्तु मे ॥

ते च– ॐ कल्याणम् ॐ कल्याणम् ॐ कल्याणम् । ॐ यथेमांवाचङ्कल्ल्याणीमावदानिजनेब्भ्यः ॥ ब्ब्रह्मराजन्न्याब्भ्याᳬंशूद्द्रायचाय्र्यायचस्वायचारणायच ॥ प्प्रियोदेवानान्दक्षिणायैदातुरिहभूयासमयम्मेकामः समृद्ध्यतामुपमादोनमतु ॥

यजमान– ॐ अद्येह (देशकालौ सङ्कीर्त्य) मम अमुककर्मणि भो ब्राह्मणाः शान्तिं भवन्तो ब्रुवन्तु, शान्तिं भवन्तो ब्रुवन्तु, शान्तिं भवन्तो ब्रुवन्तु ॥

शङ्खासुरादिनाशेन या शान्तिस्तु धरातले । तथा शुद्धिर्हि देवानां सा शान्तिस्तु भवेन् मम ॥

ते च– ॐ शान्तिः ॐ शान्तिः ॐ शान्तिः । ॐ द्यौः शान्तिरन्तरिक्क्षᳬं शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः शान्तिः ॥ व्वनस्प्पतयः शान्तिर्व्विश्श्वेदेवाः शान्तिर्ब्ब्रह्मशान्तिः सर्व्वᳬं शान्तिः शान्तिरेवशान्तिः सामाशान्तिरेधि ॥

यजमान– ॐ अद्येह ( देशकालौ सङ्कीर्त्य ) मम अमुककर्मणि भो ब्राह्मणाः श्रियं भवन्तो ब्रुवन्तु, श्रियं भवन्तो ब्रुवन्तु, श्रियं भवन्तो ब्रुवन्तु ।

श्रीकल्याणमवाप्नोति चिरजीवी भवेन्नरः । सर्वव्याधिविनिर्मुक्तस्तस्य श्रियं ब्रुवन्तु मे ॥

ते च- ॐ श्रीः ॐ श्रीः ॐ श्रीः । ॐ मनसुः काममाकूतिंव्वाचः सुत्त्यमशीय ॥ पशूनाᳬरूप मन्नस्युरसोयशः श्रीः श्रयताम्म् ॥

ॐ मन्त्रार्थाः सफलाः सन्तु पूर्णाः सन्तु मनोरथाः। शत्रूणां बुद्धिनाशोऽस्तु मित्राणामुदयोऽस्तु वः॥

भद्रमस्तु शिवं चास्तु महालक्ष्मीः प्रसीदतु । रक्षन्तु त्वां सदा देवा आशिषः सन्तु सर्वदा ॥

पुण्याहवाचनसमृद्धिरस्तु ।

दीपपूजनम्; प्रज्वालनम्—ॐ स्थिरोभवव्वीड्ड्वङ्गऽआशुर्ब्भवव्वाज्ज्यर्व्वन् । पृथुर्ब्भवसुषदस्त्व मग्नेः पुरीषवाहणः॥

आवाहनम्- ॐ दीपनारायण इह आगच्छ, इह तिष्ठ मम पूजां गृहाण । ॐ दीपनारायणाय नमः ॥

चन्दनअक्षताभिः पूजनम्- ॐ पृष्ट्टोदिविपृष्ट्टोऽअग्ग्निः पृथिव्व्याम्पृष्ट्टोव्विश्श्वाऽओषधीराविवेश॥ व्वैश्श्वानरः सहसापृष्ट्टोऽअग्ग्निः सनोदिवासरिषस्प्पातुनक्त्तम् ॥

प्रार्थना- नमोऽस्त्वनन्ताय सहस्रमूर्तये सहस्रपादाक्षिशिरोरुबाहवे ।
सहस्रनाम्ने पुरुषाय शाश्वते सहस्रकोटि युगधारिणे नमः ॥

नमः कमलनाभाय नमस्ते जलशायिने । नमस्ते केशवानन्त वासुदेव नमोऽस्तु ते ॥
वासनाद्वासुदेवस्य वासितं भुवनत्रयम् । सर्वभूतनिवासोऽसि वासुदेव नमोऽस्तु ते ॥
शुभं भवतु कल्याणमारोग्यं सुखसम्पदः । सर्वदुःखविनाशाय दीपज्योतिर्नमोऽस्तु ते ॥

**कलश स्थापनम्**- ईशानदिग्भागे अव्रणं दध्यक्षतादिभूषितं तैजसं मृण्मयं वा कलशं धान्योपरि स्थापयेत् :-

**भूमिशोधनम्**- ॐ भूरसि भूमिरस्यदितिरसि विश्वधाया विश्वस्य भुवनस्य धर्त्री ॥ पृथिवीं यच्छ पृथिवीन्दृꣳह पृथिवीम्मा हिꣳसीः ॥

**धान्यस्थापनम्**- ॐ धान्यमसि धिनुहि देवान्प्राणाय त्त्वोदानाय त्त्वा व्यानाय त्त्वा ॥ दीर्घामनु प्रसितिमायुषे धान्देवो वः सविता हिरण्यपाणिः प्रतिगृब्भ्णात्त्वच्छिद्रेण पाणिना चक्षुषे त्त्वा महीनाम्पयोसि ॥

**धन्योपरि कलशस्थापनम्**- ॐ आजिग्घ्र कलशम्मह्या त्त्वा विशन्त्विन्दवः ॥ पुनरूर्ज्जा निवर्त्तस्व सा नः सहस्त्रन्धुक्क्ष्वोरुधारा पयस्वती पुनर्म्मा विशताद्रयिः ॥

**तीर्थादिजलम्**-ॐ वरुणस्योत्तम्भनमसि वरुणस्य स्कम्भसर्ज्जनीस्त्थो वरुणस्य ऽऋतसदन्न्यसि वरुणस्य ऽऋतसदनमसि वरुणस्य ऽऋतसदनमासीद ॥

ॐ इमम्मेव्वरुणश्श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥

गङ्गे च यमुने चैव गोदावरि सरस्वति । नर्मदे सिन्धु काबेरि जलेऽस्मिन् सन्निधिं कुरु ॥

[1]सर्वौषधीः- ॐ याऽओषधीः पूर्वाजातादेवेब्भ्यस्त्रियुगम्पुरा। मनैनुबब्भ्रूणामहꣳशतन्धामानिसप्तच॥

[2]पञ्चरत्नानि- हिरण्यगर्ब्भः समवर्त्तताग्ग्रेभूतस्यजातः पतिरेकऽआसीत्॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ॥

पूगीफलादीनि- ॐ याः फलिनीर्य्याऽअफलाऽअपुष्प्पायाश्चपुष्प्पिणीः॥ बृहस्प्पतिप्प्रसूतास्तानोमुञ्चन्त्वꣳहसः ॥

यवान्- ॐ ओषधयः समवदन्तसोमेनसहराज्ञा॥ यस्म्मैकृणोतिब्ब्राह्मणस्तꣳराजन्पारयामसि॥ यवोसियवयास्म्मद्द्वेषोयवयारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्यैत्त्वाशुन्धन्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥

---

१. मुरा जटामासी बोझो कूट पत्थर कुङ्कुम। चुत्रो हलेदो कच्चूर सर्स्यूं मोथे यथाक्रम॥

२. सुन चाँदी मूगा मोती लाजावर्त भए पनि। वा सून हीरा पद्मराग नीर मोती यिनै भए॥

गन्धम्- ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम्।ईश्वरींसर्वभूतानांतामिहोपह्वयेश्रियम्॥

दूर्वा- ॐ काण्डात्त्काण्डात्त्प्ररोहन्तीपरुषःपरुषस्प्परि॥ एवानोदूर्वेप्प्रतनुसहस्रेणशतेनच ॥

सप्तमृदः[१]- ॐ स्योनापृथिविनोभवानृक्षरानिवेशनी । यच्छानःशर्म्मसप्प्रथाः॥

पञ्चपल्लवैस्तन्मुखमाच्छादनम्- ॐ अश्श्वत्त्थेवोनिषदनम्पर्ण्णेवोव्वसतिष्कृता॥गोभाजइत्किलासथ यत्त्सनवथपूरुषम् ॥

दध्यक्षतैर्भूषणम्-ॐ प्रजापतेनत्त्वदेतान्न्यन्न्योविश्श्वारूपाणिपरिताबभूव॥यत्त्कामास्त्तेजुहुमस्त्तन्नोऽ अस्त्तुव्वयँस्यामपतयोरयीणाम् ॥

वस्त्रयुग्मेनवेष्टनम्- ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु ॥ यद्दीदयच्छ वसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम् ॥ उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनि र्बृहस्प्पतयेत्त्वा॥

आम्रपल्लवैस्तन्मुखमाच्छादनम्- ॐ अम्बेऽअम्बिकेम्बालिकेनमानयतिकश्चन ॥ ससस्त्त्यश्श्वकः

१. तबेला गोठ वल्मीक हात्तीसार चतुष्पथ। राजद्वार र दोभानबाट माटो लिनू शुभ॥

सुभद्रिकाङ्काम्पीलवासिनीम् ॥

वरुणमावाह्य पूजयेत्– ॐ तत्त्वायामिब्ब्रह्मणाव्वन्दमानस्तदाशास्ते यजमानो हविर्भिः॥ अहेड मानोव्वरुणेहबोद्ध्युरुशꣳसमानऽआयुः प्रमोषीः ॥ 'ॐ अपाम्पतये वरुणाय नमः' इति मन्त्रेण पञ्चोपचारैर्वरुणं सम्पूज्य ततस्तत्रैव देवता आवाहयेत्—

गङ्गादितीर्थान्यावाहयेत्–

ॐ सर्वे समुद्रा सरितस्तीर्थानि जलदा नदाः। आयान्तु यजमानस्य दुरितक्षयकारिकाः ॥

कलशं स्पृष्ट्वा–

कलशस्य मुखे विष्णुः कण्ठे रुद्रः समाश्रितः। मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥
कुक्षौ तु सागराः सर्वे सप्तद्वीपा वसुन्धरा। अर्जुनी गोमती चैव चन्द्रभागा सरस्वती ॥
कावेरी कृष्णवेणी च गङ्गा चैव महानदी। ताप्ती गोदावरी चैव माहेन्द्री नर्मदा तथा ॥
नदाश्च विविधः जाता नद्यः सर्वास्तथापराः। पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै ॥
सर्वे समुद्राः सरितस्तीर्थानि जलदा नदाः ॥

ऋग्वेदोऽथ यजुर्वेदः सामवेदो ह्यथर्वणः। अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ॥

अत्र गायत्री सावित्री शान्तिः पुष्टिकरी तथा। आयान्तु मम शान्त्यर्थं दुरितक्षयकारिकाः ॥

ततो यजमानः स्वहस्ते अक्षतादिकं गृहीत्वा 'कलशाधिष्ठात्र्यो विष्णवादिदेवताः सुप्रतिष्ठिता भवन्तु' इत्यावाह्य ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्यज्ञमिमन्तनोत्त्वरिष्टँय्यज्ञꣳसमिमन्दधातु । व्विश्श्वेदेवा सऽइहमादयन्तामो॥ ३ँऽम्प्रतिष्ठ॥ अस्मिन् कलशे 'वरुणाद्यावाहितदेवताः सुप्रतिष्ठिता वरदा भवन्तु' इति प्रतिष्ठाप्य षोडशोपचारैः पञ्चोपचारैर्वा सम्पूजयेत् ।

प्रार्थना–

देवदानवसंवादे मथ्यमाने महोदधौ। उत्पन्नोऽसि तदा कुम्भ विधृतो विष्णुना स्वयम् ॥
त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः। त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥
शिवः स्वयं त्वमेवासि विष्णुस्त्वं च प्रजापतिः। आदित्या वसवो रुद्रा विश्वेदेवाः सपितृकाः ॥
त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः। त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥
सान्निध्यं कुरु देवेश प्रसन्नो भव सर्वदा॥
नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ।
सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥

## गणेशपूजनम् :

सङ्कल्प– ॐ अद्येत्यादि नवग्रहपूजन–जलधाराभिषेककर्म निर्विघ्नपरिसमाप्त्यर्थमादौ गणेश-
पूजनमहं करिष्ये ।

आवाहनम्– ॐ हरिः ॐ गुणानान्त्वागुणपतिꣳ हवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳ हवामहेनिधीनान्त्वा
निधिपतिꣳ हवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥
धूम्रकेतुर्गणाधक्षो भालचन्द्रो गजाननः। द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥
विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा। सङ्ग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥
आवाहयामि पूजार्थं रक्षार्थं च मम क्रतो। इहागत्य गृहाण त्वं पूजां कर्तुं च रक्ष माम् ॥
ॐ भूर्भुवः स्वः गणपते सिद्धिबुद्धिसहित सायुध सवाहन साङ्ग सपरिवार इह आगच्छ इह तिष्ठ
मम ( यजमानस्य ) पूजां गृहाण यावत् पूजां करोमि तावत् त्वं सुस्थिरो भव सुप्रसन्नो भव वरदो भव ।
हरिः ॐ सहस्रशीर्षापुरुषः सहस्राक्षः सहस्रपात् ॥ सभूमिꣳ सर्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम् ॥
आवाहयामि देवेश रक्ष त्रैलोक्य रक्षक। इहागत्य गृहाण त्वं पूजां कर्तुं च रक्ष माम् ॥

आसनम्- ॐ पुरुषऽएवेदᳪसर्व्वँय्यद्भूतँय्यच्चभाव्यम्॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति॥

रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् । आसनं च मयादत्तं गृहाण परमेश्वर ॥

आसनं समर्पयामि ।

पाद्यम्- ॐ एतावानस्यमहिमातोज्ज्यायाँश्चपूरुषः॥ पादोस्यविश्वाभूतानित्रिपादस्यामृतन्दिवि॥

उष्णोदकं निर्मलं च सर्वसौगन्धसंयुतम् । पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥

पाद्यं समर्पयामि ॥

अर्घम्- ॐ त्रिपादूर्ध्वऽउदैत्पुरुषःपादोस्येहाभवत्पुनः॥ततोविष्वङ्व्यक्रामत्साशनानशनेऽअभि॥

गन्धपुष्पाक्षतोपेतं फलेन च समन्वितम् । अर्घं गृहाण देवेश मया दत्तं हि भक्तितः ॥

अर्घं समर्पयामि ॥

आचमनीयम्- ॐ ततोविराडजायतविराजोऽअधिपूरुषः॥ सजातोऽअत्यरिच्यतपश्चाद्भूमि मथोपुरः॥

कर्पूरवासितं तोयं मन्दाकिन्याः समाहृतम् । आचम्यतां मया दत्तं प्रसीद परमेश्वर ॥

आचमनीयं समर्पयामि ॥

स्नानम्- ॐ तस्माद्यज्ञात्सर्वहुतऽऋचः सामानि जज्ञिरे ॥ छन्दाᳬसि जज्ञिरे तस्माद्यजुस्तस्मादजायत ॥

गङ्गा सरस्वती रेवा पयोष्णी नर्मदाजलैः । स्नापितोऽसि मया देव स्नानार्थं प्रतिगृह्यताम् ॥ स्नानं समर्पयामि ॥

शुद्धोदकम्- ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ विश्वᳬहि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि ॥ शुद्धोदक स्नानं समर्पयामि ॥

पञ्चामृतस्नानम्- ॐ पञ्चनद्यः सरस्वतीमपियान्ति सस्रोतसः । सरस्वती तु पञ्चधा सो देशेऽभवत्सरित् ॥ पञ्चामृतस्नानम् समर्पयामि ॥

शुद्धोदकस्नानम्- ॐ आपोऽअस्मान्मातरः शुन्धयन्तु घृतेन नो घृतप्वः पुनन्तु ॥ विश्वᳬहि रिप्रम्प्रवहन्ति देवीरुदिदाभ्यः शुचिरापूतऽएमि ॥ पञ्चामृत स्नानान्ते शुद्धोदक स्नानं समर्पयामि ॥

यज्ञोपवीतम्- ॐ ब्रह्मयज्ञानम्प्रथमम्पुरस्ताद्विसीमतः सुरुचो वेनऽआवः ॥ स बुध्न्याऽउपमाऽअस्य विष्ठाः सतश्च योनिमसतश्च विवः ॥

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतात्रयम् । उपवीतं चोत्तरीयं गृहाण परमेश्वर ॥ यज्ञोपवीतं समर्पयामि ॥

वस्त्रम्- ॐ तस्म्मादश्श्वाऽअजायन्तुयेकेचोभयादतः ॥ गावोहजज्ज्ञिरेतस्म्मात्तस्म्माज्जाताऽअजावयः ॥

सर्वभूषादिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥

वस्त्रं समर्पयामि ॥

चन्दनम्- ॐ तँय्यज्ज्ञम्बर्हिषिप्प्रौक्षन्न्पुरुषञ्जातमग्ग्रतः ॥ तेनदेवाऽअयजन्तसाद्ध्याऽऋषयश्चये ॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ ! चन्दनं प्रतिगृह्यताम् ॥

( ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वयेश्रियम् ॥ )

दूर्वापुष्पाक्षतम्- ॐ यत्त्पुरुषंव्यदधुःकतिधाव्व्यकल्प्पयन् ॥ मुखङ्किमस्यासीत्किम्बाहूकिमूरूपादाऽ उच्च्येते ॥

ॐ धान्यराजान् स्वमाङ्गल्यान् कुङ्कुमाक्तान् सुशोभनम् । मया निवेदितं भक्त्या गृहाण परमेश्वर ॥

दूर्वापुष्पाक्षतान् समर्पयामि ॥

( अक्षतान्- ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत । अस्तोषतस्वभानवोव्विप्प्रानविष्ठयामतीयो जान्विन्द्रतेहरी ॥

दूर्वान्- ॐ काण्डात्त्काण्डात्प्ररोहन्तीपरुषःपरुषस्प्परि । एवानोदूर्वेप्प्रतनुसहस्रेणशतेनच ॥

पुष्पम्—श्रीश्च्चते लक्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्श्विनौव्यात्तम् ॥ इष्णन्निषाणा मुम्म्मऽइषाण सर्वलोकम्मऽइषाण ॥

माल्यादीनी सुगन्धीनि मालत्यादीनि वै प्रभो ! मयाऽनीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ )

धूपम्- ॐ ब्राह्मणोस्य मुखमासीद्बाहू राजन्यः कृतः ॥ ऊरू तदस्य यद्वैश्श्यः पद्भ्याᳬशूद्रोऽअजायत ॥

ॐ वनस्पतिरसोद्भूतो गन्धाढ्यो गन्धउत्तमः । आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

धूपं समर्पयामि ॥

दीपम्- ॐ चन्द्रमा मनसो जातश्श्चक्षोः सूर्य्योऽअजायत ॥ श्रोत्राद्वायुश्श्च प्राणश्श्च मुखादग्निरजायत ॥

ॐ आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया । दीपं गृहाण देवेश त्र्यलोक्य तिमिरापहम् ॥

दीपं समर्पयामि ॥

नैवेद्यम्- ॐ नाभ्याऽआसीदन्तरिक्षᳬशीर्ष्णो द्यौः समवर्त्तत ॥ पद्भ्याम्भूमिर्द्दिशः श्रोत्रात्तथा लोकाँ२॥ऽअकल्प्पयन् ॥

शर्कराघृतसंयुक्तं मधुरं स्वादुचोत्तमम् । उपाहारं समानीतं नैवेद्यं प्रतिगृह्यताम् ॥

नैवेद्यं समर्पयामि ॥

आचमनीयम्– ॐ यत्पुरुषेणहविषादेवायज्ञमतन्वत। वसन्तोऽस्यासीदाज्यंङ्ग्रीष्मऽइध्मःशरद्धविः ॥
एलोशीरलवङ्गादि कर्पूरादि सुवासितम् । प्राशनायहृतं तोयं गृहाण परमेश्वर ॥
ताम्बूलं समर्पयामि, वस्त्रालाङ्कारादि समर्पयामि, ऋतुफलं समर्पयामि )

दक्षिणाम्– ॐ हिरण्यगर्भःसमवर्त्तताग्रेभूतस्यजातःपतिरेकऽआसीत् । सदाधारपृथिवीन्द्यामुते माङ्कस्मैदेवायहविषाविधेम ॥
हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥
दक्षिणां समर्पयामि ॥

प्रदक्षिणा– ॐ सप्तास्यासन्परिधयस्त्रिःसप्तसमिधःकृताः। देवायद्यज्ञन्तन्वानाऽअबध्नन्पुरुषम्पशुम् ॥
यानि कानि च पापानि जन्मान्तर कृतानि च । तानि तानि प्रणश्यन्तु प्रदक्षिण पदे पदे ॥

नारिकेलादिकं सवस्त्रं पुरतः पात्रे निधाय :

स्तुतिः – ॐ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक । भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥
द्वैमातुर कृपासिन्धो षाणमातुर जगत् प्रभो । अनेन फलदानेन फलदोऽस्तु सदा मम ॥

पुष्पाञ्जलिम्- ॐ यज्ञेनयज्ञमयजन्तदेवास्तानिधर्म्माणिप्रथमान्यासन् ॥ तेहनाकम्महिमानःसचन्त यत्रपूर्वेसाद्ध्याःसन्तिदेवाः ॥

ॐ नाना सुगन्धि पुष्पाणि देशकालोद्भवानि च । पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥

ॐ विघ्नेश्वराय वरदाय सुरप्रियाय लम्बोदराय सकलाय जगद्धिताय ।
नागाननाय श्रुतियज्ञ विभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥

वक्रतुण्ड महाकाय कोटिसूर्यसम प्रभ । निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥

रक्षाबन्धनपूजनम्- यवदूर्वासर्षपचन्दनगोमयदधिसहितां रक्षां ताम्रपात्रे निधाय पात्रं स्पृशन् नारायण-कवचं पठेत् ।

पूर्वे रक्षतु गोविन्द आग्नेय्यां धरणीधरः। याम्यां रक्षतु वाराहो नारसिंहस्तु नैर्ऋते ॥
वारुण्यां केशवो रक्षेत् वायव्यां मधुसूदनः। उत्तरे श्रीधरो रक्षेत् ऐशान्यां तु गदाधरः ॥
ऊर्ध्वं गोवर्धनो रक्षेदधस्तात् तु महेश्वरः। एवं दशदिशो रक्षेद् वासुदेवो जनार्दनः ॥
यज्ञाग्रं रक्षताच्छङ्खः पृष्ठे वै पद्ममुत्तमम् । वामपार्श्वे गदा रक्षेत् दक्षिणे च सुदर्शनम् ॥
उपेन्द्रः पातु ब्राह्मणमाचार्यं पातु वामनः। ऋग्वेदमच्युतो रक्षेद् यजुर्वेदमधोक्षजः ॥

कृष्णो रक्षतु सामानमथर्वाणं च माधवः। उपविष्टाँश्च विप्राँस्ताननिरुद्धोऽभिरक्षतु ॥
यजमानं सपत्नीकं पुण्डरीकाक्ष रक्षतु । रक्षाहीनं च यत् स्थानं तत्सर्वं रक्षताद् हरिः ॥
वेदमन्त्रैस्तु कर्तव्या रक्षा शुभ्रैस्तु सर्वषैः। कृत्वा पोटलिकां पूर्वं बध्नीयाद् दक्षिणे करे ॥

पूजयेत्– ॐ रक्षोहणंव्वलगहनंव्वैष्ष्णवीमिदमहन्तंव्वलगमुत्त्किरामियम्मेनिष्ट्ट्योयममात्त्योनिचखाने दमहन्तंव्वलगमुत्त्किरामियम्मैसमानोयमसमानोनिचखानेदमहन्तंव्वलगमुत्त्किरामियम्मेसबन्धुर्य्यमसबन्धुर्न्निचखानेदमहन्तंव्वलगमुत्त्किरामियम्मैसजातोयमसजातोनिचखानोत्त्कृत्त्याङ्किरामि॥ ॐ स्वराडसिसपत्नहासत्त्रराडस्यभिमातिहाजनराडसिरक्षोहासर्व्वराडस्यमित्त्रहा॥ ॐ रक्षोहणौवोव्वलगहनः प्प्रोक्षामिव्वैष्ष्णवान्न्रक्षोहणौवोव्वलगहनोवनयामिव्वैष्ष्णवान्न्रक्षोहणौवोव्वलगहनोवस्तृणामिव्वैष्ष्णवान्न्रक्षोहणौवांव्वलगहनाऽउपदधामिव्वैष्ष्णवीरक्षोहणौवांव्वलगहनौपर्य्यूहामिव्वैष्ष्णवीवैष्ष्णवमसिव्वैष्ष्णवास्त्थ ॥ सप्प्तऽऋषयः प्प्रतिहिताः शरीरेसप्प्तरक्षन्तिसदमप्प्रमादम् ॥ सप्प्तापः स्वपतोलोकमीयुस्त्तत्रजागृतोऽअस्वप्प्नजौसत्रसदौचदेवौ ॥

ततः प्रधानदेवतां ( साम्बशिवं ) पूजयेत् ।

## प्रधानदेवता(साम्बसदाशिव)पूजनम् :

ध्यानम्- ध्यायेन्नित्यं महेशं रजतगिरिनिभं चारुचन्द्रावतंसं
रत्नाकल्पोज्ज्वलाङ्गं परशुमृगवराभीतिहस्तं प्रसन्नम् ।
पद्मासीनं समन्तात् स्तुतममरगणैर्व्याघ्रकृत्तिं वसानं
विश्वाद्यं विश्ववन्द्यं निखिलभयहरं पञ्चवक्त्रं त्रिनेत्रम् ॥

आवाहनम्- ॐ नमस्ते रुद्र मन्यव ऽउतोत ऽइषवे नमः ॥ बाहुभ्यामुत ते नमः ॥
एह्येहि गौरीश पिनाकपाणे शशाङ्कमौले वृषभाधिरूढ ।
देवाधिदेवेश महेश नित्यं गृहाण पूजां भगवन् नमस्ते ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः ।आवाहनार्थे अक्षतपुष्पाणि समर्पयामि, नमस्करोमि ।

आसनम्- ॐ या ते रुद्र शिवा तनूरघोराऽपापकाशिनी ॥ तया नस्तन्वा शन्तमया गिरिशन्ताभि चाकशीहि ॥
रम्यं सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् ।आसनं च मया दत्तं गृहाण परमेश्वर ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः ।आसनार्थे अक्षतपुष्पाणि समर्पयामि, नमस्करोमि ॥

पाद्यम्- ॐ यामिषुं गिरिशन्त हस्ते बिभर्ष्यस्तवे ॥ शिवां गिरित्र तां कुरु मा हिंसीः पुरुषं जगत् ॥

उष्णोदकं निर्मलञ्च सर्वसौगन्धसंयुतम् ।पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः ।पादयोः पाद्यं समर्पयामि, नमस्करोमि ॥

अर्घम्- ॐ शिवेनवचसात्त्वागिरिशाच्छावदामसि ॥ यथानःसर्वमिज्जगदयक्ष्मꣳ सुमनाऽअसत् ॥
अर्घं गृहाण देवेश गन्धपुष्पाक्षतैर्युतम् ।करुणाकर देवेश प्रसन्नो भव शङ्कर ! ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः ।हस्तयोरर्घं समर्पयामि, नमस्करोमि ॥

आचमनीयम्- ॐ अद्ध्यवोचदधिवक्ताप्प्रथमोदैव्योभिषक् ॥ अहींश्चसर्वाञ्जम्भयन्त्सर्वाश्चयातुधान्न्योधराचीःपरासुव ॥
सर्वतीर्थ समायुक्तं सुगन्धि विमलं जलम् ।आचम्यतां मया दत्तं चन्द्रशेखर! शङ्कर! ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः ।आचमनीयं जलं समर्पयामि, नमस्करोमि ॥

स्नानीयम्- ॐ असौयस्ताम्म्रोऽअरुणऽउतबब्भ्रुः सुमङ्गलः ॥ येचैनꣳरुद्राऽअभितोदिक्षुश्रिताः सहस्रशोवैषाꣳहेडऽईमहे ॥
गङ्गा-सरस्वती-रेवा-पयोष्णी-नर्मदाजलैः ।स्नापितोऽसि मया देव गृह्यतां परमेश्वर ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः ।स्नानीयं जलं समर्पयामि, नमस्करोमि ॥

पञ्चामृतस्नानम् ( पयसा )– ॐ पयः॑पृथि॒व्याम्पय॒ऽओष॑धीषु॒पयो॑दि॒व्य॒न्तरि॑क्षे॒पयो॑धाः ॥ पय॑स्वतीः
प्प्र॒दिश॑ःसन्तु॒मह्य॑म् ॥
कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् । पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः । पयस्नानं समर्पयामि, नमस्करोमि ॥

शुद्धोदक– ॐ आपो॑ऽअ॒स्मान्मा॒तर॑ःशुन्धयन्तुघृ॒तेन॑नोघृत॒प्प्व॒ःपुनन्तु ॥ विश्व॒ꣳहि॒रि॒प्प्रम्प्र॒वह॑न्ति
दे॒वीरु॒दिदा॑भ्य॒ःशुचि॒रापू॑तऽएमि ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः । पयस्नानान्ते शुद्धोदकस्नानं समर्पयामि, शुद्धोदक-
स्नानान्ते आचमनीयं जलं समर्पयामि नमस्करोमि ॥

दध्ना– ॐ द॒धि॒क्राव्व्णो॑ऽअकारिषञ्जि॒ष्णोरश्व॑स्यव्वा॒जिन॑ः ॥ सु॒र॒भिनो॒मुखा॑कर॒त्त्प्रण॒ऽआयू॑ꣳषि
तारिषत् ॥
पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् । दध्यर्पितं मया देव स्नानाय प्रतिगृह्यताम् ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः । दधिस्नानं समर्पयामि, नमस्करोमि ॥

शुद्धोदक– ॐ आपो॑ऽअ॒स्मान्मा॒तर॑ःशुन्ध० ॥ दधिस्नानान्ते शुद्धोदक स्नानं समर्पयामि,

शुद्धोदक स्नानान्ते आचमनीयं जलं समर्पयामि, नमस्करोमि ॥

घृतेन– ॐ घृतम्मिमिक्षेघृतमस्ययोनिर्घृतेश्श्रितोघृतंवस्यधाम॥ अनुष्ष्वधमावहमादयस्वस्वाहा कृतंवृषभवक्षिहव्यम्॥

नवनीतसमुत्पन्नं सर्वसन्तोषकारकम् । घृतं तुभ्यं ददाम्येतत् स्नानाय प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । घृतस्नानं समर्पयामि, नमस्करोमि ॥

शुद्धोदक–ॐ आपोऽअस्म्मान्मातरः शुन्ध० ॥ ॐ श्रीभगवते साम्बसदाशिवाय नमः। घृतस्नानान्ते शुद्धोदक स्नानं समर्पयामि, शुद्धोदक स्नानान्ते आचमनीयं जलं समर्पयामि, नमस्करोमि ॥

मधुना– ॐ मधुव्वाताऽऋतायतेमधुक्क्षरन्तिसिन्धवः ॥माद्ध्वीर्न्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्त्थिवꣳ रजः ॥मधुद्यौरस्तुनःपिता॥ मधुमान्नोव्वनस्प्पतिर्म्मधुमाँ२ ॥ऽअस्तुसूर्य्यः॥ माद्ध्वीर्ग्गावोभवन्तुनः ॥

तरुपुष्पसमुद्भूतं सुस्वादु मधुरं मधु । तेजः पुष्टिकरं दिव्यं स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । मधुस्नानं समर्पयामि, नमस्करोमि ॥

शुद्धोदक– ॐ आपोऽअस्म्मान्मातरः शुन्ध० ॥ ॐ श्रीभगवते साम्बसदाशिवाय नमः। मधुस्नानान्ते

शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि, नमस्करोमि ॥

शर्करया- ॐ अपाꣳरसमुद्वयसꣳसूर्य्येसन्तꣳसमाहितम्॥ अपाꣳरसस्ययोरसस्तंवोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्रायत्त्वाजुष्टङ्गृह्णाम्येषतेयोनिरिन्द्रायत्त्वाजुष्टतमम् ॥

इक्षुसारसमुद्भूता शर्करा पुष्टिकारिका । मलापहारिणी दिव्या स्नानाय प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । शर्करास्नानं समर्पयामि, नमस्करोमि ॥

शुद्धोदक- ॐ आपोऽअस्मान्मातरꣳशुन्ध० ॥ ॐ श्रीभगवते साम्बसदाशिवाय नमः । शर्करास्नानान्ते शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि, नमस्करोमि ॥

गन्धोदक- ॐ गन्धद्वारां दुराधर्षां नित्यपुष्टां करीषिणीम् । ईश्वरीं सर्वभूतानां तामिहोपह्वये श्रियम् ॥

मलयाचलसम्भूतं चन्दनागरुवासितम् । सलिलं देवदेवेश स्नानार्थं प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । गन्धोदकस्नानं समर्पयामि, नमस्करोमि ॥

उद्वर्तनस्नानम्- ॐ अꣳशुनातेऽअꣳशुः पृच्च्यताम्परुषापरुः ॥ गन्धस्तेसोममवतुमदायरसोऽअच्च्युतः ॥

नानासुगन्धिद्रव्यं च चन्दनं रजनीयुतम् । उद्वर्तनं मया दत्तं गृहाण शशिशेखर! ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । उद्वर्तनस्नानं समर्पयामि, नमस्करोमि ॥

पुनः शुद्धोदकस्नानम्- ॐ आपोऽअस्म्मान्मातरः शुन्ध० ॥ ॐ श्रीभगवते साम्बसदाशिवाय नमः। शुद्धोदकस्नानं समर्पयामि, शुद्धोदकस्नानान्ते आचमनीयं जलं समर्पयामि, नमस्करोमि ॥

'ॐ साम्बसदाशिवाय नमः' इति नाममन्त्रेण गन्धाक्षतबिल्वपत्राधूपदीपनैवेद्यानि समर्प्य, नवग्रहादि देवतावाहन, स्थापनं पूजनं च कुर्यात् (पृ.सं.३६)। मनोजोतित्यादिमन्त्रेण षडङ्गन्यासपूर्वकं गणानान्त्वेत्यादिभिः मन्त्रैः सङ्कल्पितावृत्तिभिरभिषेकं कुर्यात् (पृ.सं.४१देखि)।

## उत्तराङ्गपूजा :

वस्त्रम्- ॐ असौयोवसर्प्पतिनीलग्ग्रीवोविलोहितः ॥ उतैनङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यः सदृष्टो मृडयातिनः ॥

सर्वभूषाधिके सौम्ये लोकलज्जानिवारणे । मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । वस्त्रं समर्पयामि, वस्त्रान्ते आचमनीयं जलं समर्पयामि, नमस्करोमि ॥

यज्ञोपवीत्- ॐ नमोऽस्तुनीलग्रीवायसहस्राक्षायमीढुषे॥ अथोयेऽअस्यसत्त्वानोहन्तेभ्योकरन्नमः॥

नवभिस्तन्तुभिर्युक्तं त्रिगुणं देवतामयम् । उपवीतं चोत्तरीयं च गृहाण परमेश्वर ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । यज्ञोपवीतं समर्पयामि, यज्ञोपवीतान्ते आचमनीयं जलं समर्पयामि, नमस्करोमि ॥

चन्दनम्- ॐ प्रमुञ्चधन्न्वनस्त्वमुभयोरार्त्क्योर्ज्ज्याम्॥ याश्चतेहस्तऽइषवः परातार्भगवोव्वप ॥

श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् । विलेपनं सुरश्रेष्ठ ! चन्दनं प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । गन्धानुलेपनं समर्पयामि, नमस्करोमि ॥

भस्म- ॐ प्रसद्यभस्मनायोनिमपश्चपृथिवीमग्ने॥ सᳫंसृज्यमातृभिष्ट्वञ्ज्योतिष्मान्पुनरासदः॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । भस्म समर्पयामि, नमस्करोमि ॥

अक्षतान्- ॐ अक्षन्नमीमदन्तह्यवप्प्रियाऽअधूषत। अस्तोषतस्वभानवोव्विप्प्रानविष्ठयामतीयोजान्विन्द्रतेहरी ॥

अक्षताश्च सुरश्रेष्ठ कुङ्कुमाक्तान् सुशोभनान् । मया निवेदितं भक्त्या गृहाण परमेश्वर ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । अक्षतान् समर्पयामि, नमस्करोमि ॥

पुष्पाणि– ॐ व्विज्ज्यन्धनुः कपर्द्दिनोव्विशल्ल्योबाणवाँ२ ॥ऽउत ॥ अनेशन्नस्यघाऽइषवऽआभुरस्य निषङ्गधिः ॥

माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ।मयाऽऽनीतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । पुष्पाणि समर्पयामि, नमस्करोमि ॥

बिल्वपत्राणि– ॐ शिवोभवप्प्रजाब्भ्योमानुषीब्भ्यस्त्वमङ्गिरः ॥माद्यावापृथिवीऽअभिशोचीर्म्मान्त रिक्षम्माव्वनस्प्पतीन् ।

त्रिदलं त्रिगुणाकारं त्रिनेत्रं च त्रिधायुधम् ।त्रिजन्मपापसंहारमेकबिल्वं शिवार्पणम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । बिल्वपत्राणि समर्पयामि, नमस्करोमि ॥

धूपम्– ॐ यातेहेतिर्म्मीढुष्ट्टमहस्त्तेबभूवतेधनुः ॥ तयास्म्मान्व्विश्श्वतस्त्त्वमयक्ष्मयापरिभुज ॥

वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ।आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । धूपमाघ्रापयामि, नमस्करोमि ॥

दीपम्– ॐ परितेधन्न्वनोहेतिरस्म्मान्व्वृणक्तुविश्श्वतः ॥ अथोयऽइषुधिस्त्तवारेऽ अस्म्मन्निधेहितम् ॥

आज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ।दीपं गृहाण देवेश ! त्रैलोक्यतिमिरापहम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । प्रत्यक्षदीपं प्रदर्शयामि, नमस्करोमि ॥

नैवेद्यम्– ॐ अवतत्त्यधनुष्ट्वꣳ सहस्राक्षशतेषुधे ॥ निशीर्य्यशल्ल्यानाम्मुखाशिवोनः सुमनाभव ॥

शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् । उपहारं समानीतं नैवेद्यं प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । नैवेद्यं निवेदयामि, नमस्करोमि ॥

आचमनीयम्– ॐ आपोऽअस्म्मान्मातरः शुन्ध० ॥

एलोशीरलवङ्गादि कर्पूरादि सुवासितम् । प्राशनायाऽहृतं तोयं गृहाण परमेश्वर ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । मुखशुद्ध्यर्थे सुवासितजलं समर्पयामि, नमस्करोमि ॥

ताम्बूलम्– ॐ नमस्तऽआयुधायानाततायधृष्ण्णवे ॥ उभाब्भ्यामुततेनमोबाहुब्भ्यान्तवधन्न्वने ॥

पूगीफलं महादिव्यं नागवल्लीदलैर्युतम् । एलाचूर्णादि संयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः । मुखवासार्थे एलालवङ्गपूगफलसहितं ताम्बूलपत्रं समर्पयामि, नमस्करोमि ॥

दक्षिणाम्– ॐ हिरण्यगर्ब्भः समवर्त्तताग्ग्रेभूतस्यजातः पतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषाविधेम ॥

हिरण्यगर्भगर्भस्थं हेमबीजं विभावसोः । अनन्तपुण्यफलदमतः शान्तिं प्रयच्छ मे ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः। द्रव्यदक्षिणां समर्पयामि, नमस्करोमि ॥

कर्पूरार्तिक्यम्– ॐ इदᳬं हुविः प्प्रजननम्मेऽअस्तुदशवीरᳬं सर्व्वगणᳮं स्वुस्तये॥ आत्मसनिप्प्रजासनि पशुसनिलोकुसन्न्यभयसनि ॥

कदलीगर्भसम्भूतं घनसारं मनोहरम्। आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः। कर्पूरार्तिक्यं समर्पयामि, नमस्करोमि ॥

प्रदक्षिणा– ॐ मानौमुहान्तमुतमानोऽअर्ब्भकम्मानुऽउक्क्षन्तमुतमानऽउक्क्षितम्॥ मानौव्वधीःपितरम्मोतमातरम्मानः प्प्रियास्तुन्वोरुद्ररीरिषः॥

यानि कानि च पापानि जन्मान्तरकृतानि च। तानि सर्वाणि नश्यन्तु प्रदक्षिण पदे पदे ॥

ॐ श्रीभगवते साम्बसदाशिवाय नमः। प्रदक्षिणां समर्पयामि ॥

पुष्पाण्यादाय बद्धाञ्जलिः पठेत्– ॐ मानस्त्तोकेतनयेमानुऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः ॥ मानोव्वीरान्नुद्रभामिनोव्वधीर्हविष्म्मन्तःसदुमित्त्वाहवामहे ॥

नानासुगन्धिपुष्पाणि देशकालोद्भवानि च। पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥

आवहनं न जानामि न जानामि विसर्जनम्। पूजां चैव न जानामि प्रसीद परमेश्वर ॥

विधिच्युतं भक्तिहीनमुपचारविवर्जितम्। तत्पूजितोऽसि भगवँस्तेनापीश प्रसीदसि ॥
ग्रहपीडाः प्रशाम्यन्तु भूतबाधा विनश्यतु। ज्वरादयोऽखिला रोगाः विनश्यन्तु त्वदीच्छया ॥
शिवशङ्कर! विश्वात्मन्! भूतेश्वर! दयामय!। भवत्स्मरणमात्रेण रक्ष नः पक्षवर्जिताम् ॥
ॐ श्रीभगवते साम्बसदाशिवाय नमः । मन्त्रपुष्पाञ्जलिं समर्पयामि ॥

## नवग्रहपूजनम् :

पूर्वनिर्मितग्रहवेद्यां श्वेतवस्त्रं प्रसार्य नवग्रहमण्डलं विलिख्य मध्यादिकोष्ठेषु उक्तदिक्षु सूर्यादिग्रहाणां स्थापनं कुर्यात्। तत्र सङ्कल्पः

ॐ अद्येत्यादि नवग्रहपूजन जलधाराभिषेककर्म निर्विघ्नपरिसमाप्त्यर्थं सकलारिष्टशान्तिप्राप्त्यर्थं नवग्रहादिपीडानिवृत्त्यर्थं च सूर्यादिनवग्रहाणां यथाविधिपूजनमहं करिष्ये ।

सूर्यस्याऽवाहनम्- ॐ आकृष्णेनु रजसावर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च॥ हिरण्ययेनसवितारथेना देवोयातिभुवनानिपश्श्यन्॥

ॐ भूर्भुवः स्वः कलिङ्गदेशोद्भव काश्यपगोत्र रक्तवर्ण भो सूर्य इहाऽगच्छ इह तिष्ठ यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव, इदमासनं समर्पयामि।

एवं प्रतिष्ठाय 'ॐ श्रीसूर्याय नमः' इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात्।

प्रार्थना- जपाकुसुमसङ्काशं काश्यपेयं महाद्युतिम्। तमोऽरिं सर्वपापघ्नं प्रणमामि दिवाकरम् ॥१॥

चन्द्रस्याऽवाहनम्- ॐ इमन्देवाऽअसपत्नꣳसुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्येन्द्रियाय ॥ इममुमुष्य्यपुत्रममुष्य्यैपुत्रमस्यैविशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणानाꣳराजा॥

ॐ भूर्भुवः स्वः यमुनातीरोद्भव आत्रेयगोत्र श्वेतवर्ण भो सोम इह आगच्छ, इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव, इदमासनं समर्पयामि ॥

एवं प्रतिष्ठाय 'ॐ श्रीसोमाय नमः' इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात्।

प्रार्थना- दधिशङ्खतुषाराभं क्षीरोदार्णव सम्भवम्। नमामि शशिनं सोमं शम्भोर्मुकुटभूषणम् ॥२॥

भौमस्याऽवाहनम्- ॐ अग्निर्म्मूर्द्धादिवः ककुत्पतिः पृथिव्याऽअयम्॥ अपाꣳरेताꣳसिजिन्वति ॥

ॐ भूर्भुवः स्वः अवन्तिकापुरोद्भव भारद्वाजगोत्र रक्तवर्ण भो भौम इहाऽगच्छ, इह तिष्ठ यावत्पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव, इदमासनं समर्पयामि ॥

एवं प्रतिष्ठाय 'ॐ श्रीभूमिपुत्राय नमः' इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात्।

प्रार्थना- धरणीगर्भसम्भूतं विद्युत्कान्तिसमप्रभम्। कुमारं शक्तिहस्तं तं मङ्गलं प्रणमाम्यहम् ॥३॥

बुधस्याऽवाहनम्– ॐ उद्बुध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्टापूर्त्तेसꣳसृजेथामयञ्च ॥ अस्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विश्श्वेदेवायजमानश्चसीदत ॥

ॐ भूर्भुवः स्वः मगधदेशोद्भव आत्रेयगोत्र हरितवर्ण भो बुध इहाऽगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव, इदमासनं समर्पयामि ॥

एवं प्रतिष्ठाय 'ॐ श्रीचन्द्रपुत्राय नमः' इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात् ।

प्रार्थना– प्रियङ्गुकलिकाश्यामं रूपेणाऽप्रतिमं बुधम् । सौम्यं सौम्यगुणोपेतं त बुधं प्रणमाम्यहम् ॥

गुरोरावाहनम्– ॐ बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम् ॥ उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा ॥

ॐ भूर्भुवः स्वः सिन्धुदेशोद्भव आङ्गिरसगोत्र पीतवर्ण भो गुरो इहाऽगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव, इदमासनं समर्पयामि ॥

एवं प्रतिष्ठाय 'ॐ श्रीजीवाय नमः' इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात् ।

प्रार्थना– देवानां च ऋषीणाञ्च गुरुं काञ्चनसन्निभम् । बुद्धिभूतं त्रिलोकेशं तं नमामि बृहस्पतिम् ॥५॥

शुक्रस्याऽवाहनम्- ॐ अन्नात्त्परिस्रुतोरसम्ब्रह्मणाव्युपिबत्क्षत्रम्पयः सोमम्प्रजापतिः ॥ ऋतेनसत्त्यमिन्द्रियंव्विपानᳬशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥

ॐ भूर्भुवः स्वः भोजकटदेशोद्भव भार्गवगोत्र रक्तवर्ण भो भौम इहाऽगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव, इदमासनं समर्पयामि ॥

एवं प्रतिष्ठाय 'ॐ श्रीभृगुनन्दनाय नमः' इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात् ।

प्रार्थना- हिमकुन्दमृणालाभं दैत्यानां परमं गुरुम् । सर्वशास्त्रप्रवक्तारं भार्गवं प्रणमाम्यहम् ॥६॥

शनेरावाहनम्- ॐ शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शंय्योरभिस्रवन्तुनः ॥

ॐ भूर्भुवः स्वः सौराष्ट्रदेशोद्भव काश्यपगोत्र कृष्णवर्ण भो भौम इहाऽगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव, इदमासनं समर्पयामि ॥

एवं प्रतिष्ठाय 'ॐ श्रीसूर्यपुत्राय नमः' इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात् ।

प्रार्थना- तिलाञ्जनसमाभासं रविपुत्रं यमाग्रजम् । छाया मार्तण्डसम्भूतं तं नमामि शनैश्चरम् ॥७॥

राहोरावाहनम्- ॐ कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥

ॐ भूर्भुवः स्वः राठिनपुरोद्भव पैठीनसगोत्र धूम्रवर्ण भो राहो इहाऽगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव, इदमासनं समर्पयामि ॥

एवं प्रतिष्ठाय 'ॐ श्रीसिंहिकापुत्राय नमः' इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात् ।

प्रार्थना– अर्धकायं महावीर्यं चन्द्रादित्यविमर्दनम् । सिंहिकागर्भसम्भूतं तं राहुं प्रणमाम्यहम् ॥८॥

केतोः आवाहनम्– ॐ केतुङ्कृण्वन्नकेतवेपेशोमर्य्याऽअपेशसे॥ समुषद्भिरजायथाः ॥

ॐ भूर्भुवः स्वः अन्तर्देशोद्भव जैमिनीगोत्र कृष्णवर्ण भो केतो इहाऽगच्छ इह तिष्ठ यावत् पूजां करोमि तावत्त्वं सुस्थिरो भव सुप्रसन्नो भव सुवरदो भव, इदमासनं समर्पयामि ॥

एवं प्रतिष्ठाय 'ॐ श्रीकेतवे नमः' इति नाममन्त्रेण पञ्चोपचारैः षोडशोपचारैर्वा पूजनं कुर्यात् ।

प्रार्थना– पलाशपुष्पसङ्काशं तारकाग्रहमस्तकम् । रौद्रं रौद्रात्मकं घोरं तं केतुं प्रणमाम्यहम् ॥९॥

ग्रहनक्षत्रजाः पीडास्तस्कराग्निसमुद्भवाः । ताः सर्वाः प्रशमं यान्तु प्रसीदन्तु नवग्रहाः ॥

पुनः धूप-दीपादि नैवेद्यादि समर्प्य ॥ अनया पूजिता आदित्यादय आवाहितदेवताः प्रीयन्तां न मम इति निवेदयेत् ॥ इति ग्रहपूजा ॥

षडङ्गन्यासान् कर्ता यजमानः ( ब्राह्मणो वा ) कुर्यात्- ॐ अद्य पूर्वोच्चारित एवं ग्रहगुणगण विशेषेण विशिष्टायां शुभपुण्यतिथौ मम आत्मनः ( यजमानस्य वा ) सकलशास्त्रश्रुति- स्मृतिपुराणोक्तफल प्राप्त्यर्थं ( अमुक )कामनासिद्ध्यर्थं नवग्रहसहितं श्रीभावानीशङ्करदेवता प्रीत्यर्थं ( अमुक )रुद्राभिषेककर्म अहं करिष्ये ॥ तदङ्गतया विहितान् शरीरशुद्ध्यर्थं लघु- षडङ्गन्यासांश्च करिष्ये ॥

ॐ मनोजूतिरिति मन्त्रस्य बृहस्पति ऋषिः बृहस्पतिर्देवता बृहतीछन्दः हृदयन्यासे जपे विनियोगः ॥

ॐ मनोजूतिर्ज्जुषतामाज्ज्यस्य बृहस्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टँय्यज्ञꣳसमिमन्दधातु। विश्श्वे देवासऽइहमादयन्तामो॥ ३म्प्रतिष्ठ॥ ॐ हृदयाय नमः ॥१॥

ॐ अबोध्यग्निरितिमन्त्रस्य बुधगविष्ठिरऋषिः अग्निर्देवता त्रिष्टुप्छन्दः शिरोन्यासे जपे विनियोगः ॥

ॐ अबोद्ध्यग्ग्निꣳसमिधाजनानाम्प्रतिधेनुमिवायतीमुषासम्॥ यह्वाऽइवप्प्रवयामुज्जिहानाः प्प्रभानवः सिस्त्रतेनाकमच्छ ॥ ॐ शिरसे स्वाहा ॥२॥

ॐ मूर्द्धानमितिमन्त्रस्य भरद्वाजऋषिः अग्निर्देवता, त्रिष्टुप्छन्दः शिखान्यासे जपे विनियोगः ॥

ॐ मूर्द्धानन्दिवोऽअरतिम्पृथिव्यावैश्श्वानरमृतऽआजातमग्ग्निम् ॥ कविꣳसम्म्राजमतिथिञ्जनाना

मासन्नापात्रेञ्जनयन्तदेवाः ॥ ॐ शिखायै वषट् ॥३॥

ॐ मर्म्माणिते इति मन्त्रस्य अप्रतिरथऋषिः मर्माणि देवता विराट्छन्दः कवचन्यासे जपे विनियोगः॥

ॐ मर्म्मीणितेव्वर्म्मीणाच्छादयामिसोमस्त्वाराजामृतेनानुवस्ताम्॥ उरोर्व्वरीयोव्वरुणस्त्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु ॥ ॐ कवचाय हुम् ॥४॥

ॐ विश्श्वतश्चक्षुरिति मन्त्रस्य विश्वकर्माभौवन ऋषिः विश्वकर्मा देवता त्रिष्टुप्छन्दः नेत्रन्यासे जपे विनियोगः ॥

ॐ विश्श्वतश्श्चक्षुरुतविश्श्वतौमुखोविश्श्वतौबाहुरुतविश्श्वतस्प्पात्॥ सम्बाहुब्भ्यान्धमतिसम्पतत्रैर्द्यावाभूमीजनयन्देवऽएकः॥ ॐ नेत्रत्रयाय वौषट् ॥५॥

ॐ मानस्तोके इति मन्त्रस्य परमेष्ठि ऋषिः एकरुद्रो देवता जगतीछन्दः अस्त्रन्यासे जपे विनियोगः ॥

ॐ मानस्त्तोकेतनयेमानऽआयुषिमानोगोषुमानोऽअश्श्वेषुरीरिषः ॥ मानोव्वीरान्त्रुद्रभामिनोव्वधीर्हविष्म्मन्तःसदमित्त्वाहवामहे ॥ ॐ अस्त्राय फट् ॥६॥

आदौ गणपतिसूक्तं जपेत् ॥ गणपतिगायत्रीन्यासः - ॐ गौरीपुत्राय हृदयाय नमः । ॐ विद्महे शिरसे स्वाहा । ॐ एकदन्ताय शिखायै वषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नो गणपतिर्नेत्रत्रयाय वौषट् । ॐ प्रचोदयात् अस्त्राय फट् । ॐ गौरीपुत्राय विद्महे एकदन्ताय धीमहि ।तन्नो गणपितः प्रंचोदयात् ॥

ध्यानम्- यं ब्रह्म वेदान्तविदो वदन्ति परं प्रधानं पुरुषं तथान्ये ।
विश्वोद्गतेः कारणमीश्वरं वा तस्मै नमो विघ्नविनाशनाय ॥

हरिः ॐ गणानान्त्वागणपतिꣳहवामहेप्प्रियाणान्त्वाप्प्रियपतिꣳहवामहेनिधीनान्त्वानिधिपतिꣳहवामहेव्वसोमम ॥ आहमजानिगर्ब्भधमात्त्वमजासिगर्ब्भधम् ॥ १ ॥ गायत्रीत्रिष्टुब्ब्जगत्त्यनुष्टुप्पङ्क्त्या सह ॥ बृहत्त्युष्ष्णिणहाककुप्सूचीभिः शम्म्यन्तुत्त्वा ॥ २ ॥ द्विपदायाश्च्च

तुष्प्पदास्त्रिपदायाश्चषट्ट्पदाः ॥ विच्छन्दायाश्चसच्छन्दाः सूची
भिःशम्म्यन्तुत्त्वा ॥ ३ ॥ सहस्तोमाः सहच्छन्दसऽआवृतः सहप्प्रमाऽ
ऋषयः सप्तदैव्याः ॥ पूर्व्वेषाम्पन्थामनुदृश्श्यधीराऽअन्वालेभिरे
रत्थ्योनरश्म्मीन् ॥ ४ ॥ यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥
दूरङ्गमञ्ज्योतिषाञ्ज्योतिरेकन्तन्मेमनः शिवसङ्कल्प्पमस्तु ॥ ५ ॥ येन
कर्म्माण्ण्यपसोमनीषिणोयज्ञेकृण्ण्वन्तिविदथेषुधीराः ॥ यदपूर्व्वं
य्यक्षमन्तः प्रजानान्तन्मेमनः शिवसङ्कल्प्पमस्तु ॥ ६ ॥ यत्प्रज्ञानमु
तचेतोधृतिश्चयज्ज्योतिरन्तरमृतम्प्रजासु ॥ यस्म्मान्नऽऋतेकिञ्चनकर्म्म

क्क्रियतेतन्मेमनः शिवसङ्कल्पमस्तु ॥७॥ येनेदम्भूतम्भुवनम्भविष्य
त्परिगृहीतममृतेनसर्वम् ॥ येनयज्ञस्तायतेसप्तहोतातन्मेमनः शिव
सङ्कल्पमस्तु ॥८॥ यस्मिन्नृचः सामयजूँषियस्मिन्प्रतिष्ठितारथना
भाविवाराः ॥ यस्मिँश्चित्तँ सर्वमोतम्प्रजानान्तन्मेमनः शिवसङ्कल्प
मस्तु ॥९॥ सुषारथिरश्वानिवयन्मनुष्यान्नेनीयतेभीशुभिर्वाजिनऽ
इव ॥ हृत्प्रतिष्ठंयदजिरञ्जविष्ठन्तन्मेमनः शिवसङ्कल्पमस्तु ॥१०॥

श्रीजपपारायणे गणेशसूक्तपाठो प्रथमः ॥१॥

ॐ गौरीपुत्राय विद्महे एकदन्ताय धीमहि । तन्नो दन्ती प्रचोदयात्॥ ॐ गणपतये नमः।
अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः। सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥
धूपदीपादिभिः सम्पूज्यताम् ॥

आदित्यग्रहोपशान्त्यर्थे श्रीसूर्यसूक्तं जपेत् । अङ्गन्यासः – ॐ भास्कराय हृदयाय नमः । ॐ विद्महे शिरसे स्वाहा । ॐ दिवाकराय शिखायै वषट् । ॐ धीमहि कवचाय हुं । ॐ तन्नः सूर्यः नेत्र-त्रयाय फट् ।

सूर्यगायत्री– ॐ भास्कराय विद्महे दिवाकराय धीमहि । तन्नः सूर्यः प्रचोदयात् ।

ध्यानम्–

भास्वान्कश्यपगोत्रजोऽरुणरुचिर्यः सिंहराशीश्वरः षट्त्रिंस्थो दशशोभने गुरुशशी भौमेषु मित्रं सदा ।
शुक्रोमन्दरिपुः कलिङ्ग जनिताश्चाग्नीश्वरौ देवते मध्ये वर्तुलपर्वदिग्दिनकरः कुर्यात् सदा मङ्गलम् ॥

ॐ ह्रां ह्रीं ह्रूँ ह्रैं ह्रौं ह्रः ॥

हरिः ॐ विभ्राड्बृहत्पिबतुसोम्म्यम्मद्ध्वायुर्दधद्यज्ञपतावविहुतम् ॥ व्वातजूतोयोऽअभिरक्षतित्त्मनाप्प्रजाः पुपोषपुरुधाव्विराजति ॥१॥ उदुत्त्यञ्जातवेदसन्देवंव्वहन्तिकेतवः ॥ दृशेव्विश्श्वायसूर्य्यम् ॥२॥

येनापावकचक्क्षसाभुरण्यन्तञ्जनाँ२ ॥ऽअनु ॥त्वंव्वरुणपश्श्यसि ॥ ३ ॥
दैव्व्यावद्ध्वर्य्यूऽआगतुङ्ग्ं रथैनसूर्य्यत्त्वचा ॥ मद्ध्वायज्ज्ञङ्ग्ं समञ्जाथे ॥
तम्प्रत्क्कथायंव्वेनश्चित्रन्देवानाम् ॥ ४ ॥ तम्प्रत्क्कथापूर्व्वथाविश्श्वथेमथा
ज्ज्येष्ठतातिम्बर्हिषदंᳬस्वर्व्विदम् ॥ प्रतीचीनंव्वृजनन्दोहसेधुनिमाशुञ्ज
यन्तमनुयासुवर्द्धसे ॥ ५ ॥ अयंव्वेनश्चोदयत्त्पृश्निगर्भाज्ज्योतिर्ज्जरा
यूरजसोव्विमाने ॥ इममपांᳬसङ्गमेसूर्य्यस्यशिशुन्नविप्रामतिभीरिहन्ति
॥ ६ ॥ चित्रन्देवानामुदगादनीकञ्चक्षुर्म्मित्त्रस्यव्वरुणस्याग्नेः ॥ आप्प्रा
द्यावापृथिवीऽअन्तरिक्षङ्ग्ं सूर्य्यऽआत्त्माजगतस्तस्थुषश्च ॥ ७ ॥

आनऽइडाभिर्व्विदथैसुशस्त्तिव्विश्श्वानरः सविताद्देवऽएतु ॥ अपियथा युवानोमत्त्सथानोव्विश्श्वञ्जगदभिपित्त्वेमनीषा ॥ ८ ॥ यदद्यकच्चव्वृत्रहन्नुदगाऽअभिसूर्य्य ॥ सर्व्वन्तदिन्द्रतेव्वशे ॥ ९ ॥ तरणिर्व्विश्श्वदर्शतोज्ज्योतिष्कृदसिसूर्य्य ॥ व्विश्श्वमाभासिरोचनम् ॥ १० ॥ तत्त्सूर्य्यस्यदेवत्त्वन्तन्महित्त्वम्मद्ध्याकर्त्तोर्व्वितत्तः सञ्जभार ॥ यदेदयुक्क्तहरितः सधस्त्थादाद्रात्रीव्वासस्त्तनुतेसिमस्म्मै ॥ ११ ॥ तन्मित्रस्यव्वरुणस्याभिचक्क्षेसूर्य्योरूपङ्कृणुतेद्योरुपस्त्थे ॥ अनन्तमन्न्यद्रुशदस्यपाजः कृष्ष्णमन्न्यद्धरितः सम्भरन्ति ॥ १२ ॥ बण्णमहाँ२ ॥ ऽअसिसूर्य्यबडादित्त्यमहाँ२ ॥ ऽअसि ॥

महस्त्तैसतोमहिमापनस्यतेद्धादेवमहाँर ॥ऽअसि॥१३॥बट्ट्सूर्य्यश्रव
सामहाँर ॥ऽअसिसत्रादेवमहाँर ॥ऽअसि॥मह्नादेवानामसुर्य्यः पुरोहितो
व्विभुज्ज्योतिरदाब्भ्यम्॥१४॥श्रायन्तऽइवसूर्य्यंव्विश्श्वेदिन्द्रस्यभक्क्ष
त॥ व्वसूनिजातेजनमानऽओजसाप्प्रतिभागन्नदीधिम॥१५॥अद्द्या
देवाऽउदितासूर्य्यस्यनिरꣳहसः पिपृतानिरवद्द्यात्॥ तन्नोमित्रोव्वरुणो
मामहन्तामदितिः सिन्धुः पृथिवीऽउतद्द्यौः ॥१६॥ आकृष्ष्णेनरजसा
व्वर्त्तमानोनिवेशयन्नमृतम्मर्त्यञ्च॥ हिरण्ण्ययेनसवितारथेनादेवोयाति
भुवनानिपश्श्यन्॥१७॥ इति जपपारायणे सूर्यसूक्तपाठे द्वितीयः ॥२॥

ॐ भास्कराय विद्महे दिवाकराय धीमहि । तन्नः सूर्यः प्रचोदयात् । ॐ ह्रः ह्रौं ह्रैं ह्रूँ ह्रीं ह्राँ श्रीसूर्याय नमः ।

ॐ ऋग्यजुः सामसंयुक्तं मण्डलं यस्य लिख्यते । ग्रहाणां प्रबलो नित्यं आदित्यस्य प्रसीदतु ॥

गन्धादिभिः सम्पूज्यताम् । श्रीआदित्यदेवता प्रीयतां सुप्रसन्नो वरदो भवतु ॥

श्रीचन्द्रगहप्रीत्यर्थं श्रीचन्द्रसूक्तं जपेत् । अङ्गन्यासः – ॐ क्षीरपुत्राय हृदयाय नमः । ॐ विद्महे शिरसे स्वाहा । ॐ अमृतत्वाय शिखायै वषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नश्चन्द्रः नेत्रत्रयाय वौषट् । ॐ प्रचोदयात् अस्त्राय फट् । श्रीचन्द्रगायत्री– ॐ क्षीरपुत्राय विद्महे अमृतत्वाय धीमहि । तन्नश्चन्द्रः प्रचोदयात् ॥

ध्यानम्–

चन्द्रः कर्कटकप्रभुः सितनिभश्चात्रेयगोत्रोद्भवश्चाग्नेयश्चतुरस्रवारुणमुखश्चापोऽप्युमाधीश्वरः ।
षट्सप्ताग्निदशैकशोभनफलो शौरिर्गुरोर्कप्रियः स्वामी यामुनदेशजो हिमकरः कुर्यात् सदा मङ्गलम् ॥

ॐ श्राँ श्रीं श्रूँ श्रैं श्रौं श्रः ॥

हरिः ॐ तदेवाग्ग्निस्तदादित्त्यस्तद्वायुस्तदुचन्द्रमाः ॥ तदेव
शुक्रन्तद्द्ब्रह्मताऽआपःसप्प्रजापतिः ॥ १ ॥ सर्व्वेनिमेषाजज्ज्ञिरेवि
द्युतःपुरुषादधि ॥ नैनमूर्द्ध्वन्नतिर्य्यञ्चन्नमद्ध्येपरिजग्ग्रभत् ॥ २ ॥
नतस्यप्प्रतिमाऽअस्तियस्यनाममहद्यशः ॥ हिरण्यगर्ब्भऽइत्त्येष
मामाहिᳫंसीदित्त्येषायस्म्मान्नजातऽइत्त्येषः ॥ ३ ॥ एषोहदेवःप्प्रदिशो
नुसर्व्वाःपूर्व्वोहजातःसऽउगर्ब्भेऽअन्तः ॥ सऽएवजातःसजनिष्ष्यमा
णःप्प्रत्त्यङ्जनास्तिष्ठतिसर्व्वतोमुखः ॥ ४ ॥ यस्म्माज्जातन्नपुराकिञ्च
नैवयऽआबभूवभुवनानिविश्श्वा ॥ प्रजापतिःप्प्रजयासᳫंरराणस्त्रीणि

ज्ज्योतीꣳषिसचतेषोडशी॥५॥येनद्यौरुग्राप्पृथिवीचदृढायेनस्वस्तभि
तँय्येननाकः॥योऽअन्तरिक्षेरजसोव्विमानङ्कस्म्मैदेवायहविषाव्विधेम
॥६॥यङ्क्रन्दसीऽअवसातस्तभानेऽअब्भ्यैक्षेतामनसारेजमाने॥
यत्राधिसूरऽउदितोव्विभातिकस्म्मैदेवायहविषाव्विधेम॥आपोहयद्बृहती
र्व्विश्वमायन्गर्भन्दधानाजनयन्तीरग्निम्। ततोदेवानाꣳसमवर्त्ततासुरेकः
र्व्वश्विदापः॥७॥व्वेनस्तत्पश्श्यन्निहितङ्गुहासद्यत्रव्विश्श्वम्भवत्त्येक
नीडम्॥तस्मिन्निदꣳसञ्चव्विचैतिसर्व्वꣳसऽओतःप्प्रोतश्चव्विभूःप्रजा
सु॥८॥प्रतद्वोचेदमृतन्नुव्विद्वान्गन्धर्व्वोधामविभृतङ्गुहासत्॥त्रीणि
पदानिनिहितागुहास्ययस्तानिव्वेदसपितुःपितासत॥९॥सनोबन्धुर्ज्ज

नितासविधाताधामानिवेदभुवनानिविश्श्वा ॥ यत्रदेवाऽअमृतमानशाना
स्तृतीयेधामन्नद्ध्यैरयन्त ॥ १० ॥ परीत्त्यभूतानिपरीत्त्यलोकान्परीत्त्यस
र्व्वाः प्प्रदिशोदिशश्च ॥ उपस्त्थायप्प्रथमजामृतस्यात्मनात्मानमभिसं
विवेश ॥ ११ ॥ परिद्यावापृथिवीसद्यऽइत्त्वापरिलोकान्परिदिशः प
रिस्वः ॥ ऋतस्यतन्तुंवितंतंविचृत्त्यतदपश्श्यत्तदभवत्तदासीत् ॥ १२ ॥
सदसस्प्पतिमद्भुतम्प्रियमिन्द्रस्यकाम्म्यम् ॥ सनिम्मेधामयासिषँस्वाहा
॥ १३ ॥ याम्मेधान्देवगणाः पितरश्चोपासते ॥ तयामामद्यमेधयाग्नेमे
धाविनङ्कुरुस्वाहा ॥ १४ ॥ मेधाम्मेव्वरुणोददातुमेधामग्निः प्प्रजापतिः ॥

मेधामिन्द्रश्चवायुश्चमेधान्धातादंदातुमेस्वाहा॥१५॥इदम्मेब्रह्मं
चक्षत्रञ्चोभिश्श्रियमश्नुताम्॥मयिदेवादधतुश्श्रियमुत्तमान्तस्यैते
स्वाहा ॥१६॥ इति श्रीजपपारायणे चन्द्रसूक्ते पाठे तृतीयः ॥३॥

ॐ क्षीरपुत्राय विद्महे अमृतत्वाय धीमहि । तन्नश्चन्द्रः प्रचोदयात् ॥

ॐ श्रः श्रौं श्रैं श्रूँ श्रीं श्राँ श्रीशीतरश्मये नमः ॥

ॐ मृगारूढं द्विजं शान्तमौषधीशं वरप्रदम् । रोहिणीसहितं ध्यायेत् सर्वकामफलप्रदम् ॥

धूपदीपादिभिः सम्पूज्यताम् । श्रीचन्द्रमादेवता प्रीयतां सुप्रसन्नो वरदो भवतु ॥

भौमारिष्टत्वोपशमनार्थे श्रीभौमसूक्तं जपेत् । श्रीभौमगायत्री– ॐ अङ्गारकाय विद्महे धरात्मजाय धीमहि । तन्नो भौमः प्रचोदयात् ॥ अङ्गन्यासः – ॐ अङ्गारकाय हृदयाय नमः । ॐ विद्महे शिरसे स्वाहा । ॐ धरात्मजाय शिखायै वौषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नो भौमः नेत्रत्रयाय वौषट् । ॐ प्रचोदयात् अस्त्राय फट् ।

भौमो दक्षिणदिक् त्रिकोणयमदिक् विघ्नेश्वरोरक्तभः स्वामी वृश्चिकमेषयोः सुरगुरुश्चार्कः शशीसौहृदः ।
ज्ञोऽरिः षट्त्रिफलप्रदश्च वसुधास्कन्दौ क्रमाद्देवते भारद्वाजकुलोद्भवः क्षितिसुतः कुर्यात् सदा मङ्गलम् ॥

ॐ क्रां क्रीं क्रूँ क्रैं क्रौं क्रः ॥

हरिः ॐ अग्निश्चपृथिवीचसन्नंतेतेमेसन्नमतामदोवायुश्चान्तरिक्ष
ञ्चसन्नंतेतेमेसन्नमतामदऽआदित्त्यश्चद्यौश्चसन्नंतेतेमेसन्नमतामदऽ
आपश्चवरुणश्चसन्नंतेतेमेसन्नमतामदः ॥ सप्तसꣳसदोऽअष्टमी
भूतसाधनी ॥ सकामाँ२ ॥ ऽअद्ध्वनस्कुरुसँज्ञानमस्तुमेमुना ॥ १ ॥ यथे
मांवाचङ्कल्ल्याणीमावदानिजनेब्भ्यः ॥ ब्रह्मराजन्न्याब्भ्याꣳशूद्राय
चार्य्यायचस्वायचारणायच ॥ प्रियोदेवानान्दक्षिणायैदातुरिहभूया

सम्मयम्मेकाम॑ᳪंसमृद्धयतामुपमादोनमतु ॥ २ ॥ बृहस्प्पतेऽअतियदर्य्योऽ
अर्हाद्द्युमद्विभातिक्क्रतुमज्जनेषु ॥ यद्दीदयच्छवसऽऋतप्प्रजाततद
स्म्मासुद्द्रविणन्धेहिचित्रम् ॥ उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनि
र्बृहस्प्पतयेत्त्वा ॥ ३ ॥ इन्द्रगोमन्निहायाहिपिबासोमᳪंशतक्क्रतो ॥ वि
द्यद्भिग्ग्रावभिᳪंसुतम् ॥ उपयामगृहीतोसीन्द्रायत्त्वागोमतऽएषतेयोनि
रिन्द्रायत्त्वागोमते ॥ ४ ॥ इन्द्रायाहिव्वृत्रहन्पिबासोमᳪंशतक्क्रतो ॥ गोम
द्भिग्ग्रावभिᳪंसुतम् ॥ उपयामगृहीतोसीन्द्रायत्त्वागोमतऽएषतेयोनि
रिन्द्रायत्त्वागोमते ॥ ५ ॥ ऋतावानंव्वैश्श्वानरमृतस्य ज्ज्योतिषस्प्पतिम् ॥

अजस्त्रङ्घर्म्ममीमहे॥ उपयामगृहीतोसिवैश्श्वानरायत्त्वैषतेयोनिर्व्वैश्श्वा
नरायत्त्वा॥६॥ व्वैश्श्वानरस्यसुमतौस्यामराजाहिकम्भुवनानामभिश्श्रीः॥
इतोजातोव्विश्श्वमिदंव्विचष्ट्टेवैश्श्वानरोयततेसूर्य्येण॥ उपयामगृहीतो
सिवैश्श्वानरायत्त्वैषतेयोनिर्व्वैश्श्वानरायत्त्वा॥७॥ व्वैश्श्वानरोनऽऊतयऽ
आप्प्रयातुपरावतः॥ अग्निरुक्त्थेनव्वाहसा॥ उपयामगृहीतोसिवैश्श्वा
नरायत्त्वैषतेयोनिर्व्वैश्श्वानरायत्त्वा॥८॥ अग्निर्ऋषिःपवमानःपाञ्च
जन्यःपुरोहितः॥ तमीमहेमहागयम्॥ उपयामगृहीतोस्यग्नयेत्त्वाव्वर्च्चसे
सऽएषतेयोनिरग्नयेत्त्वाव्वर्च्चसे॥९॥ महाँ२॥ ऽइन्द्रोव्वज्ज्रहस्त्तःषोडशी

शर्म्मीयच्छतु ॥ हन्तुपाप्प्मानँय्योस्म्मान्द्द्वेष्टि ॥ उपयामगृहीतोसिमहे

न्द्रायत्त्वैषतेयोनिर्म्महेन्द्रायत्त्वा ॥ १० ॥ तंब्वोदस्ममृतीषहंब्वसोर्म्मन्दा

नमन्धसः ॥ अभिवत्त्सन्नस्वसरेषुधेनवऽइन्द्रङ्गीर्ब्भिर्न्नवामहे ॥ ११ ॥

यद्द्वाहिष्ठन्तदग्ग्नयेबृहदर्च्चविभावसो ॥ महिषीवत्त्वद्द्रयिस्त्त्वद्द्वाजाऽ

उदीरते ॥ १२ ॥ एह्यूषुब्ब्रवाणितेग्ग्नऽइत्त्थेतरागिरः ॥ एभिर्व्वर्द्धासऽ

इन्दुभिः ॥ १३ ॥ ऋतवस्त्तेयज्ज्ञंवितन्न्वन्तुमासारक्षन्तुतेहविः ॥ सं

व्वत्त्सरस्तेयज्ज्ञन्दधातुनःप्प्रजाञ्चपरिपातुनः ॥ १४ ॥ उपह्वरेगिरीणाॅं

सङ्गमेचनदीनाम् ॥ धियाव्विप्प्रोऽअजायत ॥ १५ ॥ उच्चातेजातमन्ध

सोदिविसद्द्भूम्म्यार्ददे॥उग्ग्रꣳशर्म्ममहिश्श्रवः॥१६॥सनऽइन्द्राय
यज्ज्यवेव्वरुणायमरुद्भ्यः॥व्वरिवोवित्त्परिस्त्रव॥१७॥एनाव्विश्श्वा
न्न्यर्य्यऽआद्युम्म्नानिमानुषाणाम्॥सिषासन्तोव्वनामहे॥१८॥अनुवी
रैरनुपुष्ष्यास्म्मगोभिरन्न्वश्श्वैरनुसर्व्वेणपुष्टैः॥अनुद्द्विपदानुचतुष्ष्पदा
व्वयन्देवानोयज्ञमृतुथानयन्तु॥१९॥अग्ग्नेपत्क्नीरिहावहदेवानामुश
तीरुप॥त्वष्टारꣳसोमपीतये॥२०॥अभियज्ञङ्गृणीहिनोग्ग्रावोनेष्टः
पिबऽऋतुना॥त्वꣳहिरत्नधाऽअसि॥२१॥द्रविणोदाः पिपीषति॥
जुहोतप्प्रचतिष्ठत॥नेष्ट्रादृतुभिरिष्ष्यत॥२२॥तवायꣳसोमस्त्त्वमेह्य

र्वाङ्क्शश्वत्तमᳪंसुमनाऽअस्यपाहि॥ अस्मिन्न्यज्ञेबर्हिष्ष्यानिषद्द्या दधिष्ष्वेमञ्जठरऽइन्दुमिन्द्र॥२३॥अमेवनᳫंसुहवाऽआहिगन्तनन्निबर्हि षिसदतनारणिष्ट्न॥अथामन्दस्वजुजुषाणोऽअन्धसस्त्वष्ट्टर्द्देवेभिर्ज्ज निभिᳫंसुमदद्गणᳫं॥२४॥स्वादिष्ठयामदिष्ठयापवस्वसोमधारया॥ इन्द्रायपातवेसुतᳫं॥२५॥रक्षोहाविश्श्वचर्षणिरभियोनिमयोहते॥ द्रोणेसधस्त्थमासदत्॥२६॥ इति श्रीजपपारायणे भौमसूक्तपाठे चतुर्थः॥४॥

ॐ अङ्गारकाय विद्महे धरात्मजाय धीमहि । तन्नो भौमः प्रचोदयात् ॥ ॐ क्रः क्रौं क्रैं क्रूँ क्रीं क्राँ श्रीक्षितिजाय नमः॥

ॐ भूमिपुत्रो महातेजाः कुमारोरक्तवाससाः । ज्वलदङ्गारकश्चैव भौमः शन्तिं ददातु मे ॥४॥

धूपदीपादिभिः सम्पूज्यताम् । श्री भौमदेवता प्रीयतां सुप्रसन्नो वरदो भवतु ॥

बुधारिष्टत्वोपशमनार्थे बुधसूक्तं जपेत् । बुधगायत्री– ॐ कञ्जनेत्राय विद्महे बुद्धिश्रेष्ठाय धीमहि । तन्नश्चान्द्रिः प्रचोदयात् ॥ अङ्गन्यासः – ॐ कञ्जनेत्राय हृदयाय नमः । ॐ विद्महे शिरसे स्वाहा । ॐ बुद्धिश्रेष्ठाय शिखायै वषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नश्चान्द्रिर्नेत्रत्रयाय वौषट् । ॐ प्रचोदयात् अस्त्राय फट् ।

सौम्योदङ्मुखपीतवर्णमगधश्चात्रेयगोत्रोद्भवो बाणेशानदिशः सुहृच्छनिभृगुः शत्रुः सदा शीतगुः । कन्या युग्मपतिर्दशाष्टचतुरः षण्नेत्रकः शोभनो विष्णु पौरुषदेवते शशिसुतः कुर्यात्सदा मङ्गलम् ॥

ॐ ब्राँ ब्रीं ब्रूँ ब्रैं ब्रौं ब्रः भूर्भुवः स्वः ॥

हरिः॑ ॐ सहस्रशीर्षा पुरुषः सहस्राक्षः सहस्रपात् ॥ स भूमिꣳ सर्व्वतस्पृत्त्वात्त्यतिष्ठद्दशाङ्गुलम् ॥ १ ॥ पुरुषऽएवेदꣳ सर्व्वँय्यद्भूतँय्यच्च भाव्यम् ॥ उतामृतत्त्वस्येशानोयदन्नेनातिरोहति ॥ २ ॥ एतावानस्यमहिमातोज्ज्यायाँश्च्च पूरुषः ॥ पादोस्यव्विश्श्वाभूतानित्रिपादस्यामृतन्दिवि

॥ ३ ॥ त्रिपादूर्द्ध्व ऽउदैत्त्पुरुषः पादोस्येहाभवत्त्पुनः ॥ ततोव्विष्वङ्
व्यक्क्रामत्त्साशनानशने ऽअभि ॥ ४॥ ततोव्विराडजायतव्विराजो ऽअधि
पूरुषः ॥ सजातो ऽअत्त्यरिच्च्यतपश्चाद्भूमिमथोपुरः ॥ ५ ॥ तस्म्माद्य
ज्ञात्त्सर्व्वहुतः सम्भृतम्पृषदाज्ज्यम् ॥ पशूँस्त्ताँश्च्चक्क्रेव्वायव्यानारण्ण्या
ग्ग्राम्म्याश्च्चये ॥ ६ ॥ तस्म्माद्यज्ञात्त्सर्व्वहुत ऽऋचः सामानिजज्ञिरे ॥
छन्दाᳩसिजज्ञिरेतस्म्माद्यजुस्त्तस्म्मादजायत ॥ ७॥ तस्म्मादश्श्वा ऽ
अजायन्तयेकेचोभयादतः ॥ गावोहजज्ञिरेतस्म्मात्तस्म्माज्ज्जाता ऽ
अजावयः ॥ ८ ॥ तँय्यज्ञम्बर्हिषिप्प्रौक्क्षन्त्पुरुषञ्जातमग्ग्रतः ॥ तेनदे

वाऽअयजन्तसाद्ध्याऽऋषयश्च्चये॥९॥ यत्पुरुषंव्व्यदधुः कतिधाव्व्य
कल्प्पयन्॥ मुखङ्किमस्यासीत्तिकम्बाहूकिमूरूपादाऽउच्च्येते॥१०॥
ब्राह्मणोस्यमुखमासीद्बाहूराजन्न्यः कृतः॥ ऊरूतदस्ययद्वैश्श्यः
पद्भ्याᳬशूद्रोऽअजायत॥११॥चन्द्रमामनसोजातश्च्चक्षोः सूर्य्योऽ
अजायत॥श्रोत्राद्वायुश्च्चप्राणश्च्चमुखादग्निरजायत॥१२॥ नाब्भ्याऽ
आसीदन्तरिक्षᳬशीर्ष्णोद्यौःसमवर्त्तत॥पद्भ्याम्भूमिर्दिशः श्रोत्रा
त्तथालोकाँ२॥ऽअकल्प्पयन्॥१३॥ यत्पुरुषेणहविषादेवायज्ञमतन्न्व
त॥ व्वसन्तोस्यासीदाज्ज्यङ्ग्रीष्मऽइद्ध्मःशरद्धविः॥१४॥ सप्तास्या

सप्तास्यासन्परिधयस्त्रिः सप्त समिधः कृताः ॥ देवा यद्यज्ञन्तन्वाना ऽअबध्नन्पुरु षम्पशुम् ॥ १५ ॥ यज्ञेन यज्ञमयजन्त देवास्तानि धर्म्माणि प्रथमान्यासन् ॥ ते ह नाकम्महिमानः सचन्त यत्र पूर्व्वे साध्याः सन्ति देवाः ॥ १६ ॥ अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्म्मणः समवर्त्तताग्ग्रे ॥ तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्यस्य देवत्वमाजानमग्ग्रे ॥ १७ ॥ वेदाहमेतम्पुरुषम्महान्तमादित्यवर्ण्णन्तमसः परस्तात् ॥ तमेव विदित्वाति मृत्युमेति नान्यः पन्था विद्यतेयनाय ॥ १८ ॥ प्रजापतिश्चरति गर्ब्भे ऽअन्तरजायमानो बहुधा विजायते ॥ तस्य योनिम्परि पश्यन्ति धीरास्तस्मिन्ह तस्थुर्भुवना

निव्विशश्वां ॥१९॥ योदेवेब्भ्यऽआतपतियोदेवानाम्पुरोहितः ॥ पूर्व्वोयो
देवेब्भ्योजातोनमोरुचायब्राह्मये ॥२०॥ रुचम्ब्राह्ममञ्जनयन्तोदेवाऽ
अग्ग्रेतदब्रुवन् ॥ यस्त्वैवम्ब्राह्मणोविद्यात्तस्यदेवाऽअसन्वशे ॥२१॥
श्रीश्चतेलक्ष्मीश्चपत्न्यावहोरात्रेपार्श्वेनक्षत्राणिरूपमश्विनौव्या
त्तम् ॥ इष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽइषाण ॥२२॥

इति श्रीजपपारायणे बुधसूक्तपाठे पञ्चमः ॥५॥

ॐ कञ्जनेत्राय विद्महे बुद्धिश्रेष्ठाय धीमहि । तन्नश्चान्द्रिः प्रचोदयात् ॥

ॐ ब्रः ब्रौं ब्रैं ब्रूँ ब्रीं ब्राँ ॥ श्रीरोहिणीसुताय नमः ॥

ॐ बुधः सोमसुतो नाम प्रतिहारो गृहे गृहे । आत्मनोऽपि ततस्तत्त्वं बुधः शान्तिं ददातु मे ॥६॥

पुष्प-गन्धादिभिः सम्पूज्यताम् । श्रीबुधदेवता प्रीयतां सुप्रसन्नो वरदो भवतु ।

गुर्वरिष्टत्वोपशमनार्थं श्रीगुरुसूक्तं जपेत् । गुरुगायत्री– ॐ लोकपूज्याय विद्महे आङ्गिरसाय धीमहि । तन्नो जीवः प्रचोदयात् ॥ अङ्गन्यासः – ॐ लोकपूज्याय हृदयाय नमः। ॐ विद्महे शिरसे स्वाहा । ॐ आङ्गिरसाय शिखायै वषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नो जीवः नेत्रत्रयाय वौषट् । ॐ प्रचोदयात् अस्त्राय फट् ।

जीवश्चाङ्गिरसगोत्रजोत्तरमुखो दीर्घोत्तरे संस्थितः पीतश्चत्थसमिच्च सिन्धुजनितश्चापोऽथ मीनाधिपः । सूर्येन्दुक्षितिजप्रियो बुधसितौ शत्रू समाश्चापरे सप्ताङ्कद्विभवः शुभः सुरगुरुः कुर्यात्सदा मङ्गलम् ॥

ॐ ह्राँ ह्रीं ह्रूँ ह्रैं ह्रौं ह्रः भूर्भुवः स्वः ॥

हरिः ॐ आशुःशिशानोव्वृषभोनभीमोघनाघनःक्षोभणश्चर्षणीनाम्॥ सङ्क्रन्दनोनिमिषऽएकवीरःशतꣳसेनाऽअजयत्त्साकमिन्द्रः ॥१॥ सङ्क्रन्दनेनानिमिषेणजिष्णुनायुत्त्कारेणदुश्च्यवनेनधृष्णुना॥ तदिन्द्रेणजयतत्तत्सहद्ध्वँय्युधोनरऽइषुहस्त्तेनवृष्णणा॥२॥ सऽ

इषुहस्तैः सनिषङ्गिभिर्व्वशीसꣳस्रष्टासयुधऽइन्द्रोगणेन ॥ सꣳसृष्टजि
त्त्सोमपाबाहुशर्द्ध्युग्ग्रधन्वाप्प्रतिहिताभिरस्ता ॥ ३ ॥ बृहस्प्पतेपरिदी
यारथेनरक्षोहामित्राँ२ ॥ऽ अपबाधमानः ॥ प्रभञ्जन्त्सेनाः प्प्रमृणो
युधाजयन्नस्म्माकमेद्ध्यविताराथानाम् ॥४॥ बलविज्ञायस्थविरः
प्प्रवीरः सहस्वान्वाजीसहमानऽउग्ग्रः ॥ अभिवीरोऽअभिसत्त्वासहो
जाजैत्रमिन्द्ररथमातिष्ठगोवित् ॥५॥ गोत्रभिदङ्गोविदंवज्ज्रबाहुञ्जय
न्तमज्ज्मप्प्रमृणन्तमोजसा ॥ इमꣳसजाताऽअनुवीरयद्ध्वमिन्द्रꣳसखा
योऽअनुसꣳरभद्ध्वम् ॥६॥ अभिगोत्राणिसहसागाहमानोदयोव्वीरः

शतमन्न्युरिन्द्रः ॥ दुश्च्च्यवनः पृतनाषाडयुद्ध्योस्म्माकᳬ सेनाऽअव
तुप्प्रयुत्त्सु ॥ ७ ॥ इन्द्रऽआसान्नेताबृहस्प्पतिर्द्दक्षिणायुज्ञः पुरऽएतुसो
मः ॥ देवसेनानामभिभञ्जतीनाञ्जयन्तीनाम्मरुतोयन्त्वग्ग्रम् ॥ ८ ॥
इन्द्रस्यवृष्ष्णोव्वरुणस्यराज्ञऽआदित्त्यानाम्मरुताᳬ शर्द्धऽउग्ग्रम् ॥
महामनसाम्भुवनच्च्यवानाङ्घोषोदेवानाञ्जयतामुदस्त्थात् ॥ ९ ॥ उद्धर्ष
यमघवन्नायुधान्युत्त्सत्त्वनाम्मामकानाम्मनाᳬसि ॥ उद्वृत्रहन्वाजिनांवा
जिनान्युद्रथानाञ्जयताँय्यन्तुघोषाः ॥ १० ॥ अस्म्माकमिन्द्रः समृतेषुद्ध्व
जेष्ष्वस्म्माकँय्याऽइषवस्ताजयन्तु ॥ अस्म्माकंव्वीराऽउत्तरेभवन्त्व-

स्म्माँ२॥ऽउंदेवाऽअवताहवेषु॥११॥अमीषांञ्चित्तम्प्रतिलोभयन्तीगृहा
णाङ्गान्न्यप्प्वेपरेहि॥अभिप्प्रेहिनिर्द्दहहृत्त्सुशोकैरन्धेनामित्राास्तमसास
चन्ताम्॥१२॥अवसृष्टापरापतशरव्व्येब्ब्रह्मसᳫशिते॥ गच्छामित्रा
न्प्रपद्द्यस्वमामीषाङ्कञ्चनोच्छिषः॥१३॥प्रेताजयतानरऽइन्द्रोवःशर्म्म
यच्छतु॥उग्ग्रावः सन्तुबाहवोनाधृष्ष्यायथासथ॥१४॥ असौयासेना
मरुतःपरेषामब्भ्यैतिनऽओजसास्प्पर्द्धमाना॥ ताङ्गूहततमसापव्व्रतेन
यथामीऽअन्न्योऽअन्न्यन्नजानन्॥१५॥ यत्रबाणाःसम्पतन्तिकुमारा
व्विशिखाऽइव॥ तन्नऽइन्द्रोबृहस्प्पतिरदितिःशर्म्मयच्छतुव्विश्श्वाहा

शर्म्मयच्छतु॥१६॥मर्म्माणितेवर्म्मणाच्छादयामिसोमस्त्वाराजामृतेना
नुवस्ताम्॥उरोर्वरीयोवरुणस्तेकृणोतुजयन्तन्त्वानुदेवामदन्तु॥१७॥

इति जपपारायणे गुरुसूक्तपाठे षष्ठः ॥६॥

ॐ लोकपूज्याय विद्महे आङ्गिरसाय धीमहि । तन्नो जीवः प्रचोदयात् ।

ॐ ह्रः ह्रौं ह्रैं ह्रूँ ह्रीं ह्राँ ॐ सुराचार्याय नमः ।

ॐ धनधान्यं जयं सौख्यं सौभाग्यं नृपमान्यताम् । भवन्ति सर्वदा तेषां त्वत्प्रसादात्सुरेश्वर ॥
श्रीगुरुदेवताप्रीयतां सुप्रसन्नो वरदो भवतु ॥६॥ धूपदीपादिभिः सम्पूज्यताम् ॥

शुक्रारिष्टत्वोपशमनार्थे श्रीशुक्रसूक्तं जपेत्। शुक्रगायत्री- ॐ भार्गवाय विद्महे शुक्लाम्बराय धीमहि । तन्नः शुक्रः प्रचोदयात् ॥

अङ्गन्यासः - ॐ भार्गवाय हृदयाय नमः । ॐ विद्महे शिरसे स्वाहा । ॐ शुक्लाम्बराय शिखायै वषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नः शुक्रो नेत्रत्रयाय वौषट् । ॐ प्रचोदयात् अस्त्राय फट् ॥

शुक्रो भार्गवगोत्रजः सितनिभः प्राचीमुखः पूर्वदिक् पञ्चाङ्को वृषस्तुलाधिपमहाराष्ट्राधिपोदुम्बरः ।
इन्द्राणीमघवानुभौ बुधशनीमित्रेऽर्कचन्द्रौ रिपू षष्ठो द्विर्दशवर्जितो भृगुसुतः कुर्यात्सदामङ्गलम् ॥

ॐ द्राँ द्रीं द्रूँ द्रैं द्रौं द्रः भूर्भुवः स्वः ॥

ॐ अपाम्फेनेनैनमुचेः शिरऽइन्द्रोदवर्त्तयः ॥ विश्श्वायदजयस्पृधः ॥ १ ॥ सोमोराजामृतꣳसुतऽऋजीषेणाजहान्मृत्त्युम् ॥ ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ २ ॥ अद्द्भ्यः क्षीरंव्यपिबत्क्रुङ्ङाङ्गिरसोधिया ॥ ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ३ ॥ सोमंमद्द्भ्योव्यपिबच्छन्दसाहꣳसःशुचिषत् ॥ ऋतेनसत्त्यमिन्द्रियंविपानꣳशुक्र

मन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥४॥ अन्नात्त्परिस्स्रुतोरसम्ब्र
ह्मणाव्व्यपिबत्त्क्षत्रम्पयꣳसोमम्प्रजापतिः ॥ ऋतेनसत्त्यमिन्द्रियंव्विपा
नꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥५॥ रेतोमूत्रंव्विज
हातियोनिम्प्रविशदिन्द्रियम् ॥ गर्ब्भोजरायुणावृतऽउल्वञ्जहातिजन्म
ना ॥ ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयो
मृतम्मधु ॥६॥ दृष्ट्वारूपेव्व्याकरोत्त्सत्त्यानृतेप्प्रजापतिः ॥ अश्श्रद्धाम
नृतेदधाच्छ्रद्धाꣳसत्त्येप्प्रजापतिः ॥ ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्र
मन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥७॥ व्वेदेनरूपेव्व्यपिबत्त्सुता

सुतौप्प्रजापतिः ॥ ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्रमन्धसऽइन्द्रस्येन्द्रि यमिदम्पयोमृतम्मधु ॥८॥ दृष्ट्वापरिस्स्रुतोरसꣳशुक्क्रेणशुक्क्रंव्यपिबत्त्प यःसोमम्प्रजापतिः ॥ ऋतेनसत्त्यमिन्द्रियंव्विपानꣳशुक्क्रमन्धसऽइन्द्रस्ये न्द्रियमिदम्पयोमृतम्मधु ॥९॥ इति जपपारायणे भृगुसूक्तपाठे सप्तमः ॥७॥

ॐ भार्गवाय विद्महे शुक्लाम्बराय धीमहि । तन्नः शुक्रः प्रचोदयात् । ॐ द्रः द्रौं द्रैं द्रूँ द्रीं द्राँ । श्रीभृगुसुताय नमः।

गोक्षीरस्फटिको वर्णः शुक्रो नाम महाग्रहः । असुराणां गुरुर्योऽस्ति शुक्रः शान्तिं ददातु मे ॥

श्रीशुक्रदेवता प्रीयतां सुप्रसन्नो वरदो भवतु । धूपदीपादिभिः सम्पूज्यताम् ।

शन्यरिष्टत्वोपशमनार्थे शनिसूक्तं जपेत् । शनिगायत्री– ॐ नीलोत्पलाय विद्महे शनैश्चराय धीमहि । तन्नः सौरिः प्रचोदयात् ॥

अङ्गन्यासः – ॐ नीलोत्पलाय हृदयाय नमः । ॐ विद्महे शिरसे स्वाहा । ॐ शनैश्चराय शिखायै वषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नः सौरिः नेत्रत्रयाय वौषट् । प्रचोदयात् अस्त्राय फट् ।

मन्दः कृष्णनिभस्तु पश्चिममुखः सौराष्ट्रकः काश्यपः स्वामी माकरकुम्भयोर्बुधसितौ मित्रेसमश्चाङ्गिराः । स्थानं पश्चिमदिक् प्रजापतियमौ देवौ धनुष्यासनः षट्त्रिंस्थः शुभकृच्छनी रविसुतः कुर्यात्सदा मङ्गलम् ॥

ॐ खाँ खीं खूँ खैं खौं खः भूर्भुवः स्वः ॥

हरिः ॐ वाजश्चमेप्प्रसवश्चमेप्प्रयतिश्चमेप्प्रसितिश्चमेधीतिश्चमेक्क्रतुश्चमेस्वरश्चमेश्श्लोकश्चमेश्श्रवश्चमेश्श्रुतिश्चमेज्ज्योतिश्चमेस्वश्चमेयज्ञेनकल्प्पन्ताम् ॥ १ ॥ प्राणश्च । मेऽपानश्चमेव्व्यानश्चमेसुश्चमेचित्तञ्चमऽआधीतञ्चमेव्वाक्चमेमनश्चमेचक्षुश्चमेश्श्रोत्रञ्चमेदक्षश्चमेबलञ्चमेयज्ञेनकल्प्पन्ताम् ॥ २ ॥ ओजश्च । मेसहश्चमऽआत्त्मा

चमेतनूश्चमेशर्म्मंचमेवर्म्मंचमेङ्गानिचमेस्त्थीनिचमेपरूꣳषिचमेशरी
राणिचमआयुश्चमेजराचमेयज्ञेनकल्पन्ताम्॥ ३ ॥ ज्यैष्ठ्यञ्च।मऽ
आधिपत्त्यञ्चमेमन्युश्चमेभामश्चमेमश्चमेम्भश्चमेजेमाचमेमहिमाचमे
वरिमाचमेप्प्रथिमाचमेवर्षिमाचमेद्राघिमाचमेवृद्धञ्चमेवृद्धिश्चमेयज्ञे
नकल्पन्ताम्॥४॥सत्त्यञ्च।मेश्श्रद्धाचमेजगच्चमेधनञ्चमेविश्वञ्चमे
महश्चमेक्रीडाचमेमोदश्चमेजातञ्चमेजनिष्ष्यमाणञ्चमेसूक्तञ्चमेसुकृत
ञ्चमेयज्ञेनकल्पन्ताम्॥५॥ ऋतञ्च।मेमृतञ्चमेयक्ष्मञ्चमेनामयच्चमेजीवा
तुश्चमेदीर्ग्घायुत्त्वञ्चमेनमित्रञ्चमेभयञ्चमेसुखञ्चमेशयनञ्चमेसूषाश्च

मेसुदिनञ्चमेयज्ञेनकल्पन्ताम्॥६॥ यन्ताचमेधर्त्ताचमेक्षेमश्चमेधृति
श्चमेविश्वञ्चमेमहश्चमेसंविच्चमेज्ञात्रञ्चमेसूश्चमेप्प्रसूश्चमेसीरञ्चमे
लयश्चमेयज्ञेनकल्पन्ताम्॥७॥शञ्च।मेमयश्चमेप्प्रियञ्चमेनुकाम
श्चमेकामश्चमेसौमनसश्चमेभगश्चमेद्द्रविणञ्चमेभद्द्रञ्चमेश्श्रेयश्चमेव
सीयश्चमेयशश्चमेयज्ञेनकल्पन्ताम्॥८॥ऊर्क्चमेसूनृताचमेपय
श्चमेरसश्चमेघृतञ्चमेमधुचमेसग्ग्धिश्चमेसपीतिश्चमेकृषिश्चमेवृ
ष्टिश्चमेजैत्रञ्चमऽऔद्भिद्यञ्चमेयज्ञेनकल्पन्ताम्॥९॥रयिश्च।मेरा
यश्चमेपुष्टञ्चमेपुष्टिश्चमेविभुचमेप्प्रभुचमेपूर्णञ्चमेपूर्णतरञ्चमे

कुयवश्च मेक्षितिश्च मेन्नञ्च मेक्षुच्च मेयज्ञेनकल्पन्ताम् ॥१०॥ वित्तञ्च।
मेवेद्यञ्च मेभूतञ्च मेभविष्यच्च मेसुगञ्च मेसुपत्थ्यञ्च मऽऋद्धञ्च मऽऋद्धि
श्च मेक्लृप्तञ्च मेक्लृप्तिश्च मेमतिश्च मेसुमतिश्च मेयज्ञेनकल्पन्ता
म् ॥११॥ व्रीहयश्च।मेयवाश्च मेमाषाश्च मेतिलाश्च मेमुद्गाश्च मे
खल्वाश्च मेप्प्रियङ्गवश्च मेणवश्च मेश्श्यामाकाश्च मेनीवाराश्च मे
गोधूमाश्च मेमसूराश्च मेयज्ञेनकल्पन्ताम् ॥१२॥ अश्मा च।मेमृत्तिका
च मेगिरयश्च मेपर्व्वताश्च मेसिकताश्च मेव्वनस्प्पतयश्च मेहिरण्यञ्च मे
यश्च मेश्श्यामञ्च मेलोहञ्च मेसीसञ्च मेत्रपु च मेयज्ञेनकल्पन्ताम् ॥१३॥

अग्निश्च मऽआपश्चमेवीरुधश्चमऽओषधयश्चमेकृष्टपच्याश्चमे कृष्टपच्याश्चमेग्राम्याश्चमेपशवऽआरण्याश्चमेवित्तञ्चमेवित्ति श्चमेभूतञ्चमेभूतिश्चमेयज्ञेनकल्पन्ताम् ॥१४॥ वसुच मेवसतिश्च मेकर्मचमेशक्तिश्चमेर्थश्चमऽएमश्चमऽइत्याचमेगतिश्चमेयज्ञे नकल्पन्ताम् ॥१५॥ अग्निश्च मऽइन्द्रश्चमेसोमश्चमऽइन्द्रश्चमे सविताचमऽइन्द्रश्चमेसरस्वतीचमऽइन्द्रश्चमेपूषाचमऽइन्द्रश्चमेबृह स्पतिश्चमऽइन्द्रश्चमेयज्ञेनकल्पन्ताम् ॥१६॥ मित्रश्च मऽइन्द्रश्च मेवरुणश्चमऽइन्द्रश्चमेधाताचमऽइन्द्रश्चमेत्वष्टाचमऽइन्द्रश्चमे

मरुतश्चमऽइन्द्रश्चमेविश्श्वेचमेदेवाऽइन्द्रश्चमेयज्ञेनकल्पन्ताम्॥१७॥
पृथिवीच।मऽइन्द्रश्चमेन्तरिक्क्षञ्चमऽइन्द्रश्चमेद्यौश्चमऽइन्द्रश्चमे
समाश्चमऽइन्द्रश्चमेनक्क्षत्राणिचमऽइन्द्रश्चमेदिशश्चमऽइन्द्रश्चमे
यज्ञेनकल्पन्ताम्॥१८॥अꣳशुश्च।मेरश्म्मिश्चमेदाब्भ्यश्चमेधिपति
श्चमऽउपाꣳशुश्चमेन्तर्य्यामश्चमऽऐन्द्रवायवश्चमेमैत्रावरुणश्च
मऽआश्श्विनश्चमेप्प्रतिप्प्रस्थानश्चमेशुक्क्रश्चमेमन्थीचमेयज्ञेनक
ल्पन्ताम्॥१९॥ आग्ग्रयणश्च।मेवैश्श्वदेवश्चमेद्ध्रुवश्चमेवैश्श्वानर
श्चमऽऐन्द्राग्ग्नश्चमेमहावैश्श्वदेवश्चमेमरुत्त्वतीयाश्चमेनिष्क्कैवल्ल्य

श्चमेसावित्रश्चमेसारस्वतश्चमेपात्नीवतश्चमेहारियोजनश्चमे यज्ञेनकल्पन्ताम्॥ २०॥स्त्रुचश्च।मेचमसाश्चमेवायव्यानिचमेद्द्रोण कलशश्चमेग्ग्रावाणश्चमेधिषवणेचमेपूतभृच्चमऽआधवनीयश्चमेवेदि श्चमेबर्हिश्चमेवभृथश्चमेस्वगाकारश्चमेयज्ञेनकल्पन्ताम्॥ २१॥ अग्निश्च।मेघर्म्मश्चमेर्कश्चमेसूर्य्यश्चमेप्प्राणश्चमेश्वमेधश्चमे पृथिवीचमेदितिश्चमेदितिश्चमेद्यौश्चमेङ्गुलयःशक्क्वरयोदिशश्चमे यज्ञेनकल्पन्ताम्॥ २२॥व्रतञ्च।मऽऋतवश्चमेतपश्चमेसंवत्त्सरश्चमे होरात्रेऽऊर्वष्ठीवेबृहद्रथन्तरेचमेयज्ञेनकल्पन्ताम्॥ २३॥ एकाच।मे

तिस्रश्चमेतिस्रश्चमेपञ्चचमेपञ्चचमेसप्तचमेसप्तचमेनवचमेनव
चमऽएकादशचमऽएकादशचमेत्रयोदशचमेत्रयोदशचमेपञ्चदशचमे
पञ्चदशचमेसप्तदशचमेसप्तदशचमेनवदशचमेनवदशचमऽएकविꣳ
शतिश्चमऽएकविꣳशतिश्चमेत्रयोविꣳशतिश्चमेत्रयोविꣳशतिश्च
मेपञ्चविꣳशतिश्चमेपञ्चविꣳशतिश्चमेसप्तविꣳशतिश्चमेसप्त
विꣳशतिश्चमेनवविꣳशतिश्चमेनवविꣳशतिश्चमऽएकत्रिꣳशच्चमऽ
एकत्रिꣳशच्चमेत्रयस्त्रिꣳशच्चमेयज्ञेनकल्पन्ताम्॥२४॥ चतस्रश्च।मे
ष्टौचमेष्टौचमेद्द्वादशचमेद्द्वादशचमेषोडशचमेषोडशचमेविꣳशति

श्चमेविꣳशतिश्चमेचतुर्विꣳशतिश्चमेचतुर्विꣳशतिश्चमेष्टाविꣳश
तिश्चमेष्टाविꣳशतिश्चमेद्द्वात्रिꣳशच्चमेद्द्वात्रिꣳशच्चमेषट्ट्रिꣳशच्च
मेषट्ट्रिꣳशच्चमेचत्त्वारिꣳशच्चमेचत्त्वारिꣳशच्चमेचतुश्चत्त्वारिꣳश
च्चमेचतुश्चत्त्वारिꣳशच्चमेष्टाचत्त्वारिꣳशच्चमेयज्ञेनकल्पन्ताम्॥२५॥
त्र्यविश्च।मेत्र्यवीचमेदित्त्यवाट्ट्चमेदित्त्यौहीचमेपञ्चाविश्चमेपञ्चा
वीचमेत्रिवत्सश्चमेत्रिवत्साचमेतुर्य्यवाट्ट्चमेतुर्य्यौहीचमेयज्ञेन
कल्पन्ताम्॥२६॥ पष्ठवाट्ट्चमेपष्ठौहीचमऽउक्षाचमेवशाचमऽ
ऋषभश्चमेवेहच्चमेनड्ड्वाँश्चमेधेनुश्चमेयज्ञेनकल्पन्ताम्॥२७॥

इति जपपारायणे शनिसूक्तपाठे अष्टमः॥८॥

**ॐ नीलोत्पलाय विद्महे शनैश्चराय धीमहि । तन्नः सौरिः प्रचोदयात् ॥**

**ॐ खः खौं खैं खूँ खीं खाँ । श्रीसूर्यपुत्राय नमः ।**

**सूर्यपुत्रो दीर्घदेहो विशालाक्षः शिवप्रियः । दीर्घाचारप्रसन्नात्मा शनिः शान्तिं ददातु मे ॥**

**श्रीशनिदेवतां प्रीयतां सुप्रसन्नो वरदो भवतु ।** धूपदीपादिभिः सम्पूज्यताम् ।

राह्वनुकूलतासिद्ध्यर्थं सर्वारिष्टत्वोपशमनार्थं श्रीराहुसूक्तं जपेत् ॥ ॐ भ्राँ भ्रीं भ्रूँ भ्रैं भ्रौं भ्रः । ॐ भूर्भुवः स्वः श्रीसैंहिकेयाय नमः ॥

अङ्गन्यासः – ॐ भ्राँ हृदयाय नमः । ॐ भ्रीं शिरसे स्वाहा । ॐ भ्रूँ शिखायै वषट् । ॐ भ्रैं कवचाय हुम् । ॐ भ्रौं नेत्रत्रयाय वौषट् । ॐ भ्रः अस्त्राय फट् ॥

राहु सिंहलदेशजश्च निर्ऋतिः कृष्णाङ्ग शूर्पासनो यः पैठीनसिगोत्रसम्भवसमिद्दूर्वामुखो दक्षिणः । यः सर्पाद्यधिदेवते च निर्ऋतिः प्रत्याधिदेवः सदा षट्त्रिंस्थः शुभकृच्च सिंहिकसुतः कुर्यात्सदा मङ्गलम् ॥

**ॐ भ्राँ भ्रीं भ्रूँ भ्रैं भ्रौं भ्रः भूर्भुवः स्वः ॥**

हरिः ॐ ऋचंवाचम्प्रपद्येमनोयजुः प्रपद्येसामप्प्राणम्प्रपद्येचक्षुः श्रोत्रम्प्रपद्ये ॥ वागोजः सहौजोमयिप्प्राणापानौ ॥ १ ॥ यन्मेच्छिद्द्रञ्चक्षुषोहृदयस्यमनसोवातितृण्णम्बृहस्प्पतिर्म्मेतद्दधातु ॥ शन्नोभवतु भुवनस्ययस्प्पतिः ॥ २ ॥ भूर्भुवः स्वः । तत्सवितुर्वरेण्ण्यम्भर्गोदेवस्यधीमहि ॥ धियोयोनः प्प्रचोदयात् ॥ ३ ॥ कयानश्चित्रऽआभुवदूती सदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ ४ ॥ कस्त्वा । सत्योमदानाम्मंहिष्ठोमत्सदन्धसः ॥ दृढाचिदारुजेवसु ॥ ५ ॥ अभीषुणः सखीनामविताजरितृणाम् ॥ शतम्भवास्यूतिभिः ॥ ६ ॥ कयात्त्वन्नऽऊत्याभि

प्प्रमन्दसेवृषन्॥ कयास्त्तोतृब्भ्यऽआभर॥७॥ इन्द्रोविश्श्वस्यराजति॥
शन्नोऽअस्तुद्द्विपदेशञ्चतुष्प्पदे॥८॥ शन्नोमित्रःशंवरुणःशन्नोभव
त्त्वर्य्यमा॥शन्नऽइन्द्रोबृहस्प्पतिःशन्नोव्विष्ष्णुरुरुक्क्रमः॥९॥ शन्नो
वातःपवताᳬंशन्नस्तपतुसूर्य्यः॥ शन्नःकनिक्क्रदद्देवःपर्ज्जन्योऽ
अभिवर्षतु॥१०॥अहानिशम्भवन्तुनःशᳬंरात्रीःप्प्रतिधीयताम्॥ श
न्नऽइन्द्राग्नीभवतामवोभिःशन्नऽइन्द्रावरुणारातहव्या॥शन्नऽइन्द्रा
पूषणाव्वाजसातौशमिन्द्रासोमासुविताशँय्योः॥११॥शन्नोदेवीर
भिष्टयऽआपोभवन्तुपीतये॥शँय्योरभिस्रवन्तुनः॥१२॥स्योनापृ

थिविनोभवानृक्क्षरानिवेशनी ॥ यच्छानःशर्म्मसप्प्रथाः ॥ १३ ॥ आपो
हिष्ठामयोभुवस्त्तानऽऊर्ज्जेदधातन ॥ महेरणायचक्क्षसे ॥ १४ ॥ योवः
शिवतमोरसत्तस्यभाजयतेहनः ॥ उशतीरिवमातरः ॥ १५ ॥ तस्म्माऽअर
ङ्गमामवोयस्यक्क्षयायजिन्न्वथ ॥ आपोजनयथाचनः ॥ १६ ॥ द्यौःशा
न्तिरन्तरिक्क्षꣳशान्तिः पृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः ॥
व्वनस्प्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्ब्रह्मशान्तिःसर्व्वꣳशान्तिः
शान्तिरेवशान्तिःसामाशान्तिरेधि ॥ १७ ॥ दृतेदृꣳहमामित्रस्यमाचक्क्षु
षासर्व्वाणिभूतानिसमीक्क्षन्ताम् ॥ मित्रस्याहञ्चक्क्षुषासर्व्वाणिभूतानि

समीक्षे॥ मित्रस्यचक्षुषासमीक्षामहे॥१८॥ दृतेदृꣳहमा।ज्योक्त्ते
सन्दृशिजीव्यासञ्ज्योक्त्तेसन्दृशिजीव्यासम्॥१९॥नमस्त्ते।हरसेशो
चिषेनमस्त्तेऽअस्त्वर्च्चिषे॥अन्न्यास्त्तेऽअस्म्मत्तपन्तुहेतयःपावकोऽ
अस्म्मब्भ्यꣳशिवोभव॥२०॥ नमस्त्तेऽअस्तुविद्द्युतेनमस्त्तेस्त्तनयित्त्न
वे॥ नमस्त्तेभगवन्नस्तुयतःस्वःसमीहसे॥२१॥यतोयतःसमीहसे
ततोनोऽअभयङ्कुरु॥ शन्नःकुरुप्प्रजाब्भ्योभयन्नःपशुब्भ्यः॥२२॥
सुमित्रियानऽआपऽओषधयःसन्तुदुर्म्मित्रियास्त्तस्म्मैसन्तुयोस्म्मान्द्वेष्टि
यञ्चवयन्द्विष्म्मः॥२३॥तच्चक्षुर्द्देवहितम्पुरस्त्ताच्छुक्क्रमुच्चरत्॥पश्श्येम

मशरदः शतञ्जीवेमशरदः शतꣳशृणुयामशरदः शतम्प्रब्ब्रवामशरदः शतमदीनाःस्यामशरदः शतम्भूयश्चशरदः शतात्॥ २४॥

इति जपपारायणे राहुसूक्तपाठे नवमः ॥९॥

ॐ भ्रः भ्रौं भ्रैं भ्रूँ भ्रीं भ्राँ श्रीराहवे नमः ।

सैंहिकेयो महाग्रीवो राहुर्नाम महाग्रहः । ज्योतिषां च प्रवर्धन्ते राहुः शान्तिं ददातु मे ॥

धूपदीपादिभिः सम्पूज्यताम् । ॐ राहुग्रहः प्रीयतां सुप्रसन्नो वरदो भवतु ॥९॥

केत्वारिष्टत्वोपशमनार्थे केतुसूक्तं जपेत् । ॐ प्राँ प्रीं प्रूँ प्रैं प्रौं प्रः । ॐ भूर्भुवः स्वः श्रीकेतवे नमः । अङ्गन्यासः – ॐ प्राँ हृदयाय नमः । ॐ प्रीं शिरसे स्वाहा । ॐ प्रूँ शिखायै वषट् । ॐ प्रैं कवचाय हुम् । ॐ प्रौं नेत्रत्रयाय वौषट् । ॐ प्रः अस्त्राय फट् ।

केतुर्जैमिनिगोत्रजः कुशसमिद्वायव्यकोणेस्थितश्चित्राङ्गध्वजलाञ्छनो हिमगुहा यो दक्षिणाशामुखः । ब्रह्मा चैव सचित्रचित्रसहितः प्रत्याधिदेवः सदा षट्त्रिंस्थः शुभकृच्च बर्बरपतिः कुर्यात्सदा मङ्गलम् ॥

ॐ प्राँ प्रीं प्रूँ प्रैं प्रौं प्रः । ॐ भूर्भुवः स्वः ।

हरिः ॐ वयꣳसोमव्व्रतेतवमनस्तनूषुबिब्भ्रतः ॥ प्रजावन्तः सचेमहि ॥ १ ॥ एषतेरुद्रभागः सहस्वस्राम्बिकयातञ्जुषस्वस्वाहैषते रुद्रभागऽआखुस्तेपशुः ॥ २ ॥ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् ॥ यथानोवस्यसस्करद्यथानः श्रेयसस्करद्यथानोव्यवसाययात् ॥ ३ ॥ भेषजमसि । भेषजङ्गवेश्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै ॥ ४ ॥ त्र्यम्बकँय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्व्वारुकमिवबन्धनान्मृत्योर्म्मुक्षीयमामृतात् ॥ त्र्यम्बकँय्यजामहेसुगन्धिम्पतिवेदनम् ॥ उर्व्वारुकमिव बन्धनादितोमुक्षीयमामुतः ॥ ५ ॥ एतत्ते । रुद्रावसन्तेनपरोमूजवतोतीहि ॥

अवततधन्वापिनाकावसः कृत्तिवासाऽअहिᳬसन्नः शिवोतीहि ॥६॥
त्र्यायुषञ्जमदग्नेः कश्यपस्य त्र्यायुषम् ॥ यद्देवेषु त्र्यायुषन्तन्नोऽअस्तु
त्र्यायुषम् ॥७॥ शिवोनामासिस्वधितिस्ते पितानमस्तेऽअस्तुमामाहिᳬ
सीः ॥ निवर्त्तयाम्म्यायुषेन्नाद्यायप्रजननायरायस्पोषायसुप्रजास्त्वाय
सुवीर्य्याय ॥८॥

इति श्रीजपपारायणे केतुसूक्तपाठे दशमः ॥१०॥

ॐ प्रः प्रौं प्रैं प्रूँ प्रीं प्राँ । ॐ भूर्भुवः स्वः श्रीकेतवे नमः ।

केतुः कालः कलयिता धूम्रकेतुर्विवर्णकः । लोककेतुर्महाकेतुः केतुः शान्तिं ददातु मे ॥

धूपदीपादिभिः सम्पूज्यताम् । केतुग्रहः प्रीयतां सुप्रसन्नो वरदो भवतु ॥

# रुद्राभिषेक पाठः

( पूर्वोच्चारित सङ्कल्पं कृत्वा ) आदित्यादिनवग्रहानुकूलतासिद्ध्यर्थं ग्रहकृतराजकृतारिष्टत्वोपशमनार्थं ग्रहसूक्तपाठसिद्ध्यर्थं श्रीभवानीशङ्कररुद्रदेवताप्रीत्यर्थं श्रीशिवसूक्तपाठे नमस्ते इति षट्षष्ठिमन्त्ररुद्रात्मकाध्यायपाठमहङ्करिष्ये ।

अथ रुद्रगायत्री– ॐ तत्पुरुषाय विद्महे महादेवाय धीमहि । तन्नो रुद्रः प्रचोदयात् ॥

अङ्गन्यासः – ॐ तत्पुरुषाय हृदयाय नमः । ॐ विद्महे शिरसे स्वाहा । ॐ महादेवाय शिखायै वषट् । ॐ धीमहि कवचाय हुम् । ॐ तन्नो रुद्रः नेत्रत्रयाय वौषट् । ॐ प्रचोदयात् अस्त्राय फट् ।

ध्यानम्–

वन्दे देवमुमापतिं सुरगुरुं वन्दे जगत्कारणं वन्दे पन्नगभूषणं मृगधरं वन्दे पशूनां पतिम् ।
वन्दे सूर्य-शशाङ्क-वह्निनयनं वन्दे मुकुन्दप्रियं वन्दे भक्तजनाश्रयञ्च वरदं वन्दे शिवं शङ्करम् ॥

श्रीसाम्बसदाशिवाय नमः ॥

हरिः ॐ नमस्त्तेरुद्द्रमन्न्यवऽउतोतऽइषवेनमः॥ बाहुब्भ्यामुततेनमः
॥१॥ यातेरुद्द्रशिवातनूरघोरापापकाशिनी॥ तयानस्त्तन्न्वाशन्तमया
गिरिशन्त्ताभिचाकशीहि॥२॥ यामिषुङ्गिरिशन्त्तहस्त्तेबिभर्ष्यस्त्तवे॥
शिवाङ्गिरित्रताङ्कुरुमाहिँसीःपुरुषञ्जगत्॥३॥ शिवेनवचसात्त्वागि
रिशाच्छावदामसि॥ यथानःसर्व्वमिज्जगदयक्ष्मँसुमनाऽअसत्॥४॥
अद्ध्यवोचदधिवक्क्ताप्प्रथमोदैव्व्योभिषक्॥ अहीँश्चसर्व्वाञ्जम्भय
न्त्सर्व्वाश्चयातुधान्न्योधराचीःपरासुव॥५॥ असौयस्त्ताम्म्रोऽअरुणऽ
उतबब्भ्रुःसुमङ्गलः॥ येचैनँरुद्द्राऽअभितोदिक्क्षुश्श्रिताःसहस्त्रशो

वैषाꣳहेडऽईमहे॥६॥असौयोवसर्प्पतिनीलग्ग्रीवोव्विलोहितः॥ उतै
नङ्गोपाऽअदृश्श्रन्नदृश्श्रन्नुदहार्य्यःसदृष्टोमृडयातिनः ॥७॥नमोस्तु
नीलग्ग्रीवायसहस्राक्षायमीढुषे॥अथोयेऽअस्यसत्त्वानोहन्तेब्भ्यो
करन्नमः॥८॥ प्रमुञ्चधन्न्वनस्त्वमुभयोरात्र्क्योर्ज्ज्याम्॥ याश्चते
हस्तऽइषवःपराताभगवोव्वप॥९॥व्विज्ज्यन्धनुःकपर्दिनोव्विशल्ल्यो
बाणवाँ२॥ऽउत॥अनेशन्नस्ययाऽइषवऽआभुरस्यनिषङ्गधिः॥१०॥
यातेहेतिर्म्मीढुष्टमहस्तेबभूवतेधनुः॥तयास्म्मान्व्विश्श्वतस्त्वमयक्ष्म
यापरिभुज॥११॥परितेधन्न्वनोहेतिरस्म्मान्व्वृणक्तुव्विश्श्वतः॥ अथो

यऽइ॑षु॒धिस्त॒वारे॒ऽअ॒स्म्मन्नि॒धेहि॒तम्॥१२॥अ॒व॒तत्त्य॒धनु॒ष्ट्व६सह॑स्रा
क्क्ष॒शतेषुधे॥ नि॒शीर्य्य॑श॒ल्ल्याना॒म्मुखा॒शि॒वोनः॒सु॒मनाभव॥१३॥
नम॑स्त॒ऽआयु॑धा॒यानाततायधृ॒ष्ण्णवे॥ उ॒भाब्भ्या॒मु॒तते॒नमो॒बा॒हुब्भ्या॒
न्तवधन्न्वने॥१४॥ मानो॑म॒हान्त॑मु॒तमानो॑ऽअर्ब्भ॒कम्मा॒न॒ऽउक्क्षन्त॑मु॒
तमान॒ऽउक्क्षि॒तम्॥ मानो॑व्वधीः॒पि॒तर॒म्मोतमा॒तर॒म्मानः॒प्प्रि॒यास्त॒न्न्वो॒
रुद्ररीरिषः॥१५॥ मान॒स्त्तो॒केतन॑ये॒मान॒ऽआयु॑षि॒मानो॒गोषु॒मानो॒ऽअ
श्श्वे॑षुरीरिषः॥ मानो॑व्वी॒रान्न्रुद्र॒भा॒मि॒नो॒व्वधीर्ह॒वि॒ष्म॑न्त॒ःसद॒मि॒त्त्वाह
वामहे॥१६॥ नमो॒हिर॑ण्ण्यबाहवेसेना॒न्न्ये॒दि॒शाञ्च॒पत॑ये॒नमो॒नमो॑व्वृ॒क्षे

ब्भ्योहरिकेशेब्भ्यःपशूनाम्पतयेनमोनमःशष्प्पिञ्जरायत्त्विषीमतेप
थीनाम्पतयेनमोनमोहरिकेशायोपवीतिनेपुष्ट्टानाम्पतयेनमोनमोबब्भ्लु
शाय ॥१७॥ नमोबब्भ्लुशायव्व्याधिनेन्नानाम्पतयेनमोनमोभवस्य
हेत्त्यैजगताम्पतयेनमोनमोरुद्द्रायाततायिनेक्षेत्त्राणाम्पतयेनमोनमःसू
तायाहन्त्यैव्वनानाम्पतयेनमोनमोरोहिताय ॥१८॥ नमोरोहितायस्त्थ
पतयेव्वृक्षाणाम्पतयेनमोनमोभुवन्तयेव्वारिवस्कृतायौषधीनाम्पतये
नमोनमोमन्त्रिणेव्वाणिजायकक्क्षाणाम्पतयेनमोनमऽउच्चैर्घोषाया
क्क्रन्दयतेपत्तीनाम्पतयेनमोनमःकृत्स्नायतया ॥१९॥ नमःकृत्स्नायतया

धावतेसत्त्वनाम्पतयेनमोनमः सहमानायनिव्याधिनऽआव्याधिनीनाम्प
तयेनमोनमोनिषङ्गिणेककुभायस्तेनानाम्पतयेनमोनमोनिचेरवेपरि
चरायारण्ण्यानाम्पतयेनमोनमोवञ्चते ॥२०॥ नमोवञ्चतेपरिवञ्चते
स्तायूनाम्पतयेनमोनमोनिषङ्गिणऽइषुधिमतेतस्कराणाम्पतयेनमोनमः
सृकायिब्भ्योजिघांसद्भ्योमुष्णताम्पतयेनमोनमोसिमद्भ्यो
नक्तञ्चरद्भ्योविकृन्तानाम्पतयेनमः ॥२१॥ नमऽउष्णीषिणेगिरि
चरायकुलुञ्चानाम्पतयेनमोनमऽइषुमद्भ्योधन्वायिब्भ्यश्चवोनमो
नमऽआतन्वानेब्भ्यः प्रतिदधानेब्भ्यश्चवोनमोनमऽआयच्छद्भ्यो

स्यद्भ्यश्चवो॒नमो॒नमो॒विसृजद्भ्यः ॥२२॥ नमो॒विसृजद्भ्यो॒विद्ध्य
द्भ्यश्चवो॒नमो॒नमः स्वपद्भ्यो॒जाग्रद्भ्यश्चवो॒नमो॒नम॒ःशयाने
भ्य॒ऽ आसीनेभ्यश्चवो॒नमो॒नम॒स्तिष्ठद्भ्यो॒धावद्भ्यश्चवो॒नमो॒
नमः स॒भाभ्यः ॥२३॥ नमः स॒भाभ्यः स॒भापतिभ्यश्चवो॒नमो॒नमो
अश्वे॒भ्यो अश्वपतिभ्यश्चवो॒नमो॒नम॒ऽआव्या॒धिनीभ्यो॒वि॒विद्ध्यन्ती
भ्यश्चवो॒नमो॒नम॒ऽउगणाभ्यस्तृꣳहतीभ्यश्चवो॒नमो॒नमो॒गणेभ्यः
॥२४॥ नमो॒ग॒णेभ्यो॒ग॒णपतिभ्यश्चवो॒नमो॒नमो॒व्रातेभ्यो॒व्रातपति
भ्यश्चवो॒नमो॒नमो॒गृत्सेभ्यो॒गृत्सपतिभ्यश्चवो॒नमो॒नमो॒विरूपेभ्यो

द्विश्वरूपेभ्यश्चवो नमो नमः सेनाभ्यः ॥ २५ ॥ नमः सेनाभ्यः सेनानि
भ्यश्चवो नमो नमो रथिभ्यो ऽअरथेभ्यश्चवो नमो नमः क्षत्तृभ्यः
सङ्ग्रहीतृभ्यश्चवो नमो नमो महद्भ्यो ऽअर्भकेभ्यश्चवो नमः ॥ २६ ॥
नमस्तक्षभ्यो रथकारेभ्यश्चवो नमो नमः कुलालेभ्यः कर्मारेभ्य
श्चवो नमो नमो निषादेभ्यः पुञ्जिष्ठेभ्यश्चवो नमो नमः श्वनिभ्यो
मृगयुभ्यश्चवो नमो नमः श्वभ्यः ॥ २७ ॥ नमः श्वभ्यः श्वपतिभ्य
श्चवो नमो नमो भवाय च रुद्राय च नमः शर्वाय च पशुपतये च नमो नील
ग्रीवाय च शितिकण्ठाय च नमः कपर्दिने ॥ २८ ॥ नमः कपर्दिने च व्यु

प्प्तकेशाय च नमः सहस्राक्षाय च शतधन्वने च नमो गिरिशयाय च शि
पिविष्टाय च नमो मीढुष्टमाय चेषुमते च नमो ह्रस्वाय ॥ २९ ॥ नमो ह्रस्वाय
च वामनाय च नमो बृहते च वर्षीयसे च नमो वृद्धाय च सवृधे च नमोग्ग्र्याय
च प्प्रथमाय च नमऽआशवे ॥ ३० ॥ नमऽआशवे चाजिराय च नमः शीग्घ्र्या
य च शीब्भ्याय च नमऽऊर्म्म्याय चावस्वन्याय च नमो नादेयाय च द्द्वीप्प्या
य च ॥ ३१ ॥ नमो ज्ज्येष्ठाय च कनिष्ठाय च नमः पूर्व्वजाय चापरजाय च नमो
मद्ध्यमाय चापगल्भाय च नमो जघन्याय च बुद्ध्न्याय च नमः सोब्भ्या
य ॥ ३२ ॥ नमः सोब्भ्याय च प्प्रतिसर्य्याय च नमो याम्म्याय च क्षेम्म्याय च

नमःश्श्लोक्क्यायचावसान्न्यायचनमऽउर्व्वर्य्यायचखल्ल्यायचनमोवन्न्या
य ॥ ३३ ॥ नमोवन्न्यायचकक्क्ष्यायचनमःश्श्रवायचप्प्रतिश्श्रवायच
नमऽआशुषेणायचाशुरथायचनमःशूरायचावभेदिनेचनमोबिल्मिने
॥ ३४ ॥ नमोबिल्मिनेचकवचिनेचनमोवर्म्मिणेचवरूथिनेचनमः
श्श्रुतायचश्श्रुतसेनायचनमोदुन्दुब्भ्यायचाहनन्न्यायचनमोधृष्ण्णवे
॥ ३५ ॥ नमोधृष्ण्णवेचप्प्रमृशायचनमोनिषङ्गिणेचेषुधिमतेचनम
स्तीक्ष्णेषवेचायुधिनेचनमःस्वायुधायचसुधन्न्वनेच ॥ ३६ ॥ नमः
स्स्रुत्त्यायचपत्थ्यायचनमःकाट्ट्यायचनीप्प्यायचनमःकुल्ल्यायचस

रस्यायचनमोनादेयायचवैशन्तायचनमःकूप्प्याय॥३७॥नमःकूप्प्या
यचावट्ट्यायचनमोवीध्र्यायचातप्प्यायचनमोमेघ्यायचविद्युत्त्याय
चनमोवर्ष्यायचावर्ष्यायचनमोवात्त्याय॥३८॥नमोवात्त्यायचरेष्म्या
यचनमोवास्तव्यायचवास्तुपायचनमःसोमायचरुद्रायचनमस्ताम्राय
चारुणायचनमःशङ्गवे॥३९॥नमःशङ्गवे।चपशुपतयेचनमऽउग्रा
यचभीमायचनमोग्ग्रेवधायचदूरेवधायचनमोहन्त्रेचहनीयसेचनमो
वृक्षेब्भ्योहरिकेशेब्भ्योनमस्ताराय॥४०॥नमःशम्भवाय।चमयो
भवायचनमःशङ्करायचमयस्करायचनमःशिवायचशिवतरायच

॥४१॥ नमः पार्य्याय चावार्य्याय च नमः प्रतरणाय चोत्तरणाय च नम
स्तीर्त्थ्याय च कूल्ल्याय च नमः शष्प्याय च फेन्न्याय च नमः सिकत्त्याय
॥४२॥ नमः सिकत्त्याय च प्रवाह्याय च नमः किᳪशिलाय च क्षयणा
य च नमः कपर्द्दिने च पुलस्तये च नमऽइरिण्याय च प्रपत्थ्याय च नमो
व्व्रज्याय ॥४३॥ नमो व्व्रज्याय च गोष्ठ्याय च नमस्तल्प्याय च गेह्या
य च नमो हृदय्याय च निवेष्प्याय च नमः काट्याय च गह्वरेष्ठाय च नमः
शुष्क्याय ॥४४॥ नमः शुष्क्याय च हरित्त्याय च नमः पाᳪसव्याय च
रजस्याय च नमो लोप्प्याय चोलप्प्याय च नमऽऊर्व्याय च सूर्व्याय च नमः

पर्ण्णाय ॥४५॥ नमः॑ पर्ण्णायचपर्ण्णशदायच॒नमऽउद्गुरमाणायचा
भिघ्नतेच॒नमऽआखिदतेचप्प्रखिदतेच॒नमऽइषुकृद्भ्योधनुष्कृद्भ्यश्च
वोनमोनमोवः किरिकेभ्योदेवानाᳬहृदयेभ्योनमोविचिन्वत्केभ्यो
नमोविक्षिणत्केभ्योनमऽआनिर्हतेभ्यः॥४६॥ द्रापेऽअन्धसस्पते
दरिद्रनीललोहित॥ आसाम्प्रजानामेषाम्पशूनाम्माभेर्म्मारोङ्मोचनः
किञ्चनाममत्॥४७॥ इमारुद्रायतवसेकपर्द्दिनेक्षयद्वीरायप्प्रभरा
महेमतीः॥ यथाशमसद्द्विपदेचतुष्प्पदेविश्श्वम्पुष्टङ्ग्रामेऽअस्म्मिन्न
नातुरम्॥४८॥ यातेरुद्रशिवातनूःशिवाविश्श्वाहाभेषजी॥ शिवारु

तस्यभेषजीतयानोमृडजीवसे ॥४९॥ परिनोरुद्रस्यहेतिर्वृणक्तुपरित्त्वे
षस्यदुर्म्मतिरघायोः ॥ अवस्थिरामघवद्भ्यस्तनुष्वमीढ्वस्तोका
यतनयायमृड ॥५०॥ मीढुष्टमशिवतमशिवोनः सुमनाभव ॥ परमे
वृक्षऽआयुधन्निधायकृत्तिंवसानऽआचरपिनाकम्बिभ्रदागहि ॥५१॥
विकिरिद्रविलोहितनमस्तेऽअस्तुभगवः ॥ यास्तेसहस्रꣳहेतयोन्य
मस्मन्निवपन्तुताः ॥५२॥ सहस्राणिसहस्रशोबाह्वोस्तवहेतयः ॥
तासामीशानोभगवःपराचीनामुखाकृधि ॥५३॥ असङ्ख्यातासहस्रा
णियेरुद्राऽअधिभूम्म्याम् ॥ तेषाꣳसहस्रयोजनेवधन्वानितन्मसि

॥५४॥ अस्म्मिन्महत्त्यर्णवेन्तरिक्षेभवाऽअधि॥ तेषाᳪंसहस्रयोजनेवधन्न्वानितन्न्मसि॥५५॥ नीलग्ग्रीवाः शितिकण्ठादिवᳬंरुद्द्राऽउपश्श्रिताः॥ तेषाᳪंसहस्रयोजनेवधन्न्वानितन्न्मसि॥५६॥ नीलग्ग्रीवाः शितिकण्ठाःशर्व्वाऽअधःक्षमाचराः॥ तेषाᳪंसहस्रयोजनेवधन्न्वानितन्न्मसि॥५७॥ येव्वृक्षेषुशष्प्पिञ्जरानीलग्ग्रीवाव्विलोहिताः॥ तेषाᳪंसहस्रयोजनेवधन्न्वानितन्न्मसि॥५८॥ येभूतानामधिपतयोव्विशिखासः कपर्द्दिनः॥ तेषाᳪंसहस्रयोजनेवधन्न्वानितन्न्मसि॥५९॥ येपथाम्पथिरक्षयऽऐलबृदाऽआयुर्य्युधः॥ तेषाᳪंसहस्रयोजनेवधन्न्वानितन्न्मसि

॥६०॥ येतीर्त्थानिप्प्रचरन्तिसृकाहस्त्तानिषङ्गिणः॥ तेषाᳪंसहस्र
योजनेवधन्न्वानितन्मसि॥६१॥ येन्नेषुव्विविद्ध्यन्तिपात्रेषुपिबतोज
नान्॥तेषाᳪंसहस्रयोजनेवधन्न्वानितन्मसि॥६२॥यऽएतावन्तश्च
भूयाᳪंसश्चदिशोरुद्द्रावितस्त्थिरे॥तेषाᳪंसहस्रयोजनेवधन्न्वानि
तन्मसि॥६३॥ नमोस्त्तुरुद्द्रेब्भ्योयेदिवियेषांव्वर्षमिषवः॥तेब्भ्यो
दशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोर्द्ध्वाः॥ तेब्भ्यो
नमोऽअस्त्तुतेनोवन्त्तुतेनोमृडयन्त्तुतेयन्द्विष्म्मोयश्चनोद्द्वेष्ट्टितमेषाञ्जम्भे
दद्ध्मः॥६४॥ नमोस्त्तुरुद्द्रेब्भ्योयेन्त्तरिक्षेयेषांव्वातऽइषवः॥तेब्भ्यो

दशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वाः ॥ तेब्भ्यो
नमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्ट्टितमेषाञ्जम्भे
दद्ध्मः ॥६५॥ नमोस्तुरुद्रेब्भ्योयेपृथिव्व्याँय्येषामन्नमिषवः ॥ तेब्भ्यो
दशप्प्राचीर्द्दशदक्षिणादशप्प्रतीचीर्द्दशोदीचीर्द्दशोद्ध्वाः ॥ तेब्भ्यो
नमोऽअस्तुतेनोवन्तुतेनोमृडयन्तुतेयन्द्विष्म्मोयश्चनोद्वेष्ट्टितमेषाञ्जम्भे
दद्ध्मः ॥६६॥हरिः ॐ व्वयꣳसोमव्व्रतेतवमनस्त्तनूषुबिब्भ्रतः ॥प्रजा
वन्तꣳसचेमहि॥६७॥एषतेरुद्रभागः सहस्वस्त्राम्बिकयातञ्जुषस्वस्वाहैष
तेरुद्रभागऽआखुस्तेपशुः ॥६८॥ अवरुद्रमदीमह्यवदेवन्त्र्यम्बकम् ॥य

थानोवस्यसस्करद्यथानःश्श्रेयसस्करद्यथानोव्यवसाययात् ॥ ६९ ॥
भेषजमसि। भेषजङ्गवेश्श्वायपुरुषायभेषजम् ॥ सुखम्मेषायमेष्यै ॥७० ॥
त्र्यम्बकँय्यजामहेसुगन्धिम्पुष्टिवर्द्धनम् ॥ उर्वारुकमिवबन्धनान्मृत्त्यो
र्म्मुक्षीयमामृतात् ॥ त्र्यम्बकँय्यजामहेसुगन्धिम्पतिवेदनम् ॥ उर्वारुकमिव
बन्धनादितोमुक्षीयमामुतः ॥७१ ॥ एतत्ते। रुद्रावसन्तेनपरोमूजवतोतीहि ॥
अवततधन्वापिनाकावसःकृत्तिवासाऽअहिंसन्नःशिवोतीहि ॥७२ ॥
त्र्यायुषञ्जमदग्नेःकश्श्यपस्यत्र्यायुषम् ॥ यद्देवेषुत्र्यायुषन्तन्नोऽअस्तु
त्र्यायुषम् ॥७३ ॥ शिवोनामासिस्वधितिस्तेपितानमस्तेऽअस्तुमामाहिंस

सीᳬ ॥ निर्वर्त्तयाम्म्यायुषेन्नाद्यायप्प्रजननायरायस्प्पोषायसुप्प्रजास्त्वाय सुवीर्य्याय ॥७४॥ इति श्रीजपपारायणे एकादशः ॥११॥

## शान्ति पाठः

हरिः ॐ अश्मन्नूर्ज्जम्पर्वतेशिश्श्रियाणामद्भ्यऽओषधीभ्भ्यो वनस्प्पतिभ्भ्योऽअधिसम्भृतम्पयः ॥ तान्नऽइषमूर्ज्जन्धत्तमरुतᳬसᳬर राणाऽअश्मँस्त्तेक्षुन्मयितऽऊर्ग्गयन्द्विष्मस्तन्तेशुग्गृच्छतु ॥१॥ इमा मेऽअग्नऽइष्टकाधेनवः सन्त्वेकाचदशचदशचशतञ्चशतञ्चसहस्रञ्च सहस्रञ्चायुतञ्चायुतञ्चनियुतञ्चनियुतञ्चप्प्रयुतञ्चाब्बुर्दञ्चन्न्यर्ब्बुदञ्च

समुद्रश्चमद्ध्यञ्चान्तश्चपरार्द्धश्चैतामेऽअग्ग्नऽइष्टकाधेनवः सन्त्वमुत्रामुष्मिँल्लोके ॥ २ ॥ ऋतवस्त्थऽऋतावृधऽऋतुष्ठास्त्थऽऋतावृधः ॥ घृतश्च्युतोमधुश्च्युतोव्विराजोनामकामदुघाऽअक्षीयमाणाः ॥ ३ ॥ समुद्रस्यत्त्वावकयाग्ग्नेपरिव्ययामसि ॥ पावकोऽअस्म्मब्भ्यᳪंशिवोभव ॥ ४ ॥ हिमस्यत्त्वाजरायुणाग्ग्नेपरिव्ययामसि ॥ पावकोऽअस्म्मब्भ्यᳪं शिवोभव ॥ ५ ॥ एतन्तेदेवसवितर्य्यज्ञम्प्राहुर्बृहस्प्पतयेब्ब्रह्मणे ॥ तेनयज्ञमवतेनयज्ञपतिन्तेनमामव ॥ ६ ॥ मनोजूतिर्ज्जुषतामाज्ज्यस्यबृहस्प्पतिर्य्यज्ञमिमन्तनोत्त्वरिष्टँय्यज्ञᳪंसमिमन्दधातु ॥ व्विश्श्वेदेवासऽइ

हमादयन्त्तामो ॥ ३ँम्प्रतिष्ठ ॥७॥ होतायक्क्षदश्श्विनौच्छागस्यहविषऽ
आत्त्तामद्ध्यमंव्द्ध्यतोमेदऽउद्द्धृतम्पुराद्द्वेषोब्भ्यः पुरापौरुषेय्या गृभो
घस्त्तान्नूनङ्घासेऽअंज्ज्राणाँय्यवसप्प्रथमानाॅंसुमत्त्क्षराणाॅंशतरुद्द्रिया
णामग्ग्निष्ष्वात्त्तानाम्पीवोपवसनानाम्पार्श्श्वतः श्श्रोणितः शितामतऽउ
त्त्सादतोङ्गादङ्गादवत्त्तानाङ्करतऽएवाश्श्विनाजुषेतांॅहविर्होतर्य्यज ॥८॥
होतायक्क्षत्त्सरस्वतीम्मेषस्यहविषऽआवयदद्ध्यमंव्द्ध्यतोमेदऽउद्द्धृं
तम्पुराद्द्वेषोब्भ्यः पुरापौरुषेय्यागृभोघसंन्नूनङ्घासेऽअंज्ज्राणाँय्यव
सप्प्रथमानाॅंसुमत्त्क्षराणाॅंशतरुद्द्रियाणामग्ग्निष्ष्वात्त्तानाम्पीवो

पवसनानाम्पाश्श्र्वृतश्श्रौणितश्शितामुतऽउत्त्सादुतोङ्गादङ्गादवत्त्तानाङ्करंदेवर्ठ्ठसरस्वतीजुषताᳫंहविर्होतुर्य्यज ॥ ९ ॥ होतायक्षुदिन्द्रमृषभस्यंहविषुऽआवयदुद्द्यमद्ध्युतोमेदुऽउदृद्धृतम्पुराद्द्वेषौभ्यःपुरापौरुषेय्यागृभोघसन्नूनङ्घासेऽअज्ज्राणाँय्यवसप्प्रथमानाᳫंसुमत्त्क्षराणाᳫंशतरुद्रियाणामग्गिष्वात्तानाम्पीवोपवसनानाम्पाश्श्र्वृतश्श्रौणितश्शितामुतऽउत्त्सादुतोङ्गादङ्गादवत्त्तानाङ्करंदेवमिन्द्रोजुषताᳫंहविर्होतुर्य्यज ॥ १० ॥ होतायक्षुद्द्वनुस्प्पतिमुभिहिपिष्ट्टतमयारभिष्ठयारशनयाधित ॥ यत्राश्श्विनोश्छागस्यहुविषंःप्प्रियाधामानियत्रसरस्व

त्त्यामेषस्यंहुविषंःप्प्रियाधामानियत्रेन्द्रस्यऽऋषभस्यंहुविषंःप्प्रियाधा
मानियत्राग्ग्नेःप्प्रियाधामानियत्रसोमस्यप्प्रियाधामानियत्रेन्द्रस्यसुत्रा
म्णःप्प्रियाधामानियत्रंसवितुःप्प्रियाधामानियत्रव्वरुणस्यप्प्रियाधामा
नियत्रव्वनस्प्पतेःप्प्रियापाथांᳩसियत्रदेवानामाज्ज्यपानाम्प्रियाधामा
नियत्राग्ग्नेर्होतुःप्प्रियाधामानितत्रैतान्प्रस्तुत्त्यैवोपस्तुत्त्यैवोपावस्त्रक्ष
द्रभीयसऽइवकृत्त्वीकर्देवन्देवोव्वनस्प्पतिर्ज्जुषतांᳩहुविर्होतर्य्यज
॥११॥आयुर्य्यज्ञेन।कल्प्पताम्प्राणोयज्ञेनकल्प्पताञ्चक्षुर्य्यज्ञेनकल्प्प
तांᳩश्रोत्रँय्यज्ञेनकल्प्पतांव्वाग्ग्यज्ञेनकल्प्पताम्मनोयज्ञेनकल्प्पतामा

त्क्रमायज्ञेनकल्प्पताम्ब्रह्ममायज्ञेनकल्प्पताञ्ज्योतिर्य्यज्ञेनकल्प्पताᳪं स्वर्य्यज्ञेनकल्प्पताम्पृष्ठᳪं य्यज्ञेनकल्प्पताँय्यज्ञोयज्ञेनकल्प्पताम् ॥ स्तोमश्चयजुश्चऽऋक्चसामचबृहच्चरथन्तरञ्च ॥ स्वर्द्देवाऽअगन्मामृताऽअभूमप्प्रजापतेः प्प्रजाऽअभूमवेट्ट्स्वाहा ॥ १२ ॥ ॐस्वस्तिनऽइन्द्रोव्वृद्धश्श्रवाः स्वस्तिनः पूषाव्विश्श्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिः स्वस्तिनोबृहस्प्पतिर्द्दधातु ॥ १३ ॥ ॐ पयः पृथिव्याम्पयऽओषधीषुपयोदिव्व्यन्तरिक्षेपयोधाः ॥ पयस्वतीः प्प्रदिशः सन्तुमह्यम् ॥ १४ ॥ व्विष्णोरराटमसिव्विष्णोः श्नप्त्रेस्त्थोव्विष्णोः स्यूरसि

व्विष्ण्णोर्द्ध्रुवोसि॥ वैष्ण्णवमसिव्विष्ण्णवेत्त्वा॥ १५॥ अग्निर्द्देवताव्वातो
देवतासूर्य्योदेवताचन्द्रमादेवताव्वसवोदेवतारुद्द्रादेवतादित्त्यादेवतामरुतो
देवताव्विश्श्वेदेवादेवताबृहस्प्पतिर्द्देवतेन्द्द्रोदेवताव्वरुणोदेवता॥ १६॥
ॐ सद्द्योजातम्प्रपद्द्यामिसद्द्योजातायवैनमोनमः॥ भवेभवेनातिभवे
भवस्वमाँभवोद्भवायनमः॥ १७॥ व्वामदेवायनमोज्ज्येष्ठायनमःश्रे
ष्ठायनमोरुद्द्रायनमःकालायनमःकलविकरणायनमोबलविकरणाय
नमोबलायनमोबलप्प्रमथनायनमःसर्व्वभूतदमनायनमोमनोन्मनायनमः
॥ १८॥ अघोरेभ्योथघोरेभ्योघोरघोरतरेभ्यः॥ सर्व्वेभ्यःसर्व्वशर्व्वेभ्योनमः

स्त्तेऽअस्तुरुद्द्ररूपेभ्यः ॥१९॥ तत्पुरुषायविद्महेमहादेवायधीमहि ॥ तन्नो
रुद्द्रः प्रचोदयात् ॥२०॥ ईशानःसर्व्वविद्यानामीश्वरःसर्व्वभूतानाम् ॥
ब्रह्माधिपतिर्ब्रह्मणोधिपतिर्ब्रह्माशिवोमेऽअस्तुसदाशिवोम् ॥२१॥
ॐ शिवोनामासिस्वधितिस्त्तेपितानमस्त्तेऽअस्तुमामाहिᳬसीः ॥ निव
र्त्तयाम्म्यायुषेन्नाद्यायपप्रजननायरायस्पोषायसुप्प्रजास्त्वायसुवीर्य्याय
॥२२॥ ॐविश्वानिदेवसवितर्दुरितानिपरासुव ॥ यद्भद्रन्तन्नऽआसुव
॥२३॥ ॐ द्यौःशान्तिरन्तरिक्षᳬशान्तिः पृथिवीशान्तिरापःशान्तिरो
षधयःशान्तिः ॥ वनस्प्पतयःशान्तिर्व्विश्श्वेदेवाःशान्तिर्ब्रह्मशान्तिः

सर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि ॥ २४ ॥ ॐ सर्व्वेषांवाऽ एषव्वेदानाꣳरसोयत्त्सामसर्व्वेषामेवैनमेतद्वेदानाꣳरसेनाभिषिञ्चति ॥ २५ ॥ ॐ शान्तिः शान्तिः सुशान्तिर्भवतु सर्वारिष्टशान्तिर्भवतु ॥ अनेन रुद्राभिषेककर्मणा कृतेन श्रीभवानीशङ्करमहारुद्रः प्रीयतां न मम ॥ ॐ सदाशिवार्पणमस्तु ॥ इति जपपारायणे द्वादशः ॥

# नवग्रह-वैदिकमन्त्राणि

ॐ आकृष्ष्णेनरजसाव्वर्त्तमानोनिवेशयन्नमृतम्मर्त्त्यञ्च ॥ हिरण्ययेन सवितारथेनादेवोयातिभुवनानिपश्श्यन् ॥ १ ॥ इमन्देवाऽअसपत्त्नꣳसुव दध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्स्येन्द्रियाय ॥ इमम्

मुष्य्यंपुत्रममुष्य्यैपुत्रमस्यैव्विशऽएषवोमीराजासोमोस्म्माकम्ब्राह्मणा
नाᳬराजा॥२॥अग्ग्निर्म्मूर्द्धादिवꣳककुत्त्पतिꣳपृथिव्व्याऽअयम्॥अपाᳬ
रेताᳬसिजिन्न्वति॥३॥उद्बुद्ध्यस्वाग्ग्नेप्प्रतिजागृहित्त्वमिष्ट्टापूर्त्तेसꣳ
सृजेथामयञ्च॥अस्म्मिन्त्सधस्त्थेऽअद्ध्युत्तरस्म्मिन्विश्श्वेदेवायजमा
नश्चसीदत॥४॥बृहस्प्पतेऽअतियदर्य्योऽअर्हाद्द्युमद्विभातिक्क्रतुम
ज्जनेषु॥यद्दीदयच्छवसऽऋतप्प्रजाततदस्म्मासुद्द्रविणन्धेहिचित्रम्॥
उपयामगृहीतोसिबृहस्प्पतयेत्त्वैषतेयोनिर्बृहस्प्पतयेत्त्वा॥५॥अन्नात्त्प
रिस्त्रुतोरसम्ब्रह्मणाव्व्यपिबत्त्क्षत्त्रम्पयꣳसोमम्प्रजापतिꣳ॥ऋतेनसत्त्य

मिन्द्रियंव्विपानꣳ शुक्क्रमन्धसऽइन्द्रस्येन्द्रियमिदम्पयोमृतम्मधु ॥ ६ ॥
शन्नोदेवीरभिष्टयऽआपोभवन्तुपीतये ॥ शँय्योरभिस्स्रवन्तुनः ॥ ७ ॥
कयानश्चित्रऽआभुवदूतीसदावृधः सखा ॥ कयाशचिष्ठयावृता ॥ ८ ॥
केतुङ्कृण्ण्वन्नकेतवेपेशोमर्य्याऽअपेशसे ॥ समुषद्भिरजायथाः ॥ ९ ॥

# शुक्लयजुर्वेदाध्यायानामाद्यन्तमन्त्राः

हरिः ॐ इषेत्त्वोर्ज्जेत्त्वाव्वायवस्त्थदेवोवः सविताप्प्रार्प्पयतुश्श्रेष्ठ्ठतमायकर्म्मणऽआप्प्यायद्ध्वमघ्न्याऽइन्द्रायभागम्प्रजावतीरनमीवाऽ

अयक्ष्मामावस्तेनऽईशतमाघशꣳसोद्ध्रुवाऽअस्मिन्गोपतौस्यातबह्वी र्य्यजमानस्यपशून्पाहि॥ १ ॥सवितुस्त्वांप्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेण पवित्त्रेणसूर्य्यस्यरश्मिभिः ॥सवितुर्वःप्प्रसवऽउत्त्पुनाम्म्यच्छिद्द्रेण पवित्त्रेणसूर्य्यस्यरश्मिभिः ॥तेजोसिशुक्क्रमस्यमृतमसिधामनामासि प्प्रियन्देवानामनाधृष्टन्देवयजनमसि॥ २ ॥कृष्णोस्याखरेष्ठोग्ग्नयेत्त्वा जुष्टम्प्प्रोक्षामिवेदिरसिबर्हिषेत्त्वाजुष्टाम्प्प्रोक्षामिबर्हिरसिस्त्रुग्ग्भ्यस्त्वा जुष्टम्प्प्रोक्षाम्म्यदित्त्यैव्व्युन्दनम्॥ ३ ॥ऊर्ज्जंव्वहन्तीरमृतङ्घृतम्पयःकी लालम्परिस्त्रुतम्॥स्वधास्त्थतर्प्पयतमेपितॄन्॥४॥समिधाग्ग्निन्दुवस्यत

घृतैर्ब्बोधयतातिथिम् ॥ आस्मिन्हव्याजुहोतन ॥ ५ ॥ शिवोनामासिस्व
धितिस्तेपितानमस्तेऽअस्तुमामाहिꣳसीः ॥ निर्वर्त्तयाम्म्यायुषेन्नाद्या
यप्प्रजननायरायस्प्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥ ६ ॥ एदमगन्मदेव
यजनम्पृथिव्यायत्रदेवासोऽअजुषन्तविश्वे ॥ ऋक्सामाभ्याꣳसन्त
रन्तोयजुर्भीरायस्प्पोषेणसमिषामदेम ॥ इमाऽआपःशमुमेसन्तुदेवीरो
षधेत्रायस्वस्वधितेमैनꣳहिꣳसीः ॥ ७ ॥ यातेधामानिहविषायजन्तिताते
विश्वापरिभूरस्तुयज्ञम् ॥ गयस्प्फानःप्प्रतरणःसुवीरोवीरहाप्प्रचरासो
मदुर्य्यान् ॥ ८ ॥ अग्नेस्त्तनूरसिविष्णवेत्त्वासोमस्यतनूरसिविष्णवे

त्त्वातिंथेरातिंत्थ्यमंसिव्विष्ण्णवेत्त्वाश्श्येनायंत्त्वासोमभृतेव्विष्ण्णवेत्त्वा
ग्ग्नयेंत्त्वारायस्प्पोषदेव्विष्ण्णवेत्त्वा ॥ ९ ॥ द्याम्मालेखीरन्तरिक्षम्मा हिंᳩ
सीः पृथिव्व्यासम्भंव ॥ अयᳪ हित्त्वास्वधितिस्त्तेतिंजानः प्प्रणिनायमहते
सौभंगाय ॥ अतस्त्त्वन्देंवव्वनस्प्पतेशतवंल्शोव्विरोहसहस्त्रंवल्शाव्वियᳪ
रुहेम ॥ १० ॥ देवस्यंत्त्वासवितुः प्प्रसवेश्श्विनोंर्ब्बाहुब्भ्याम्पूष्ण्णोहस्त्ता
ब्भ्याम् ॥ आदंदेनार्य्यसीदमहᳪ रक्षसाङ्ग्ग्रीवाऽअपिंकृन्त्तामि ॥ यवों
सियवयास्म्मद्वेषोयवयारातीर्द्दिवेत्त्वान्तरिक्षायत्त्वापृथिव्व्यैत्त्वाशुन्ध
न्ताँल्लोकाः पितृषदनाः पितृषदनमसि ॥ ११ ॥ त्वमङ्ग्ग प्प्रशᳪसिषोदेवः श

विष्ठुमर्त्यीम् ॥ नत्त्वदन्न्योमघवन्नस्त्तिमर्ड्डितेन्द्रब्ब्रवीमितेव्वचः ॥ १२ ॥
व्वाचस्प्पतयेपवस्वव्वृष्ण्णोऽअꣳशुब्भ्याङ्गभस्त्तिपूतः ॥ देवोदेवेब्भ्यः प
वस्वयेषाम्भागोसि ॥ १३ ॥ कोदात्त्कस्म्माऽअदात्त्कामोदात्त्कामायादात् ॥
कामोदाताकामः प्प्रतिग्ग्रहीताकामैतत्ते ॥ १४ ॥ उपयामगृहीतोस्यादित्त्ये
ब्भ्यस्त्त्वा ॥ व्विष्ण्णऽउरुगायैषतेसोमस्त्तꣳरक्षस्वमात्त्वादभन् ॥ १५ ॥
आपवस्वहिरण्ण्यवदश्श्ववत्त्सोमव्वीरवत् ॥ व्वाजङ्गोमन्तमाभरस्वाहा
॥ १६ ॥ देवसवितः प्प्रसुवयज्ञम्प्रसुवयज्ञपतिम्भगाय ॥ दिव्व्योगन्धर्व्वः के
तपूः केतन्नः पुनातुव्वाचस्प्पतिर्व्वाजन्नः स्वदतुस्वाहा ॥ १७ ॥ इमन्देवाऽअ

सपत्त्नकᳬं सुवद्ध्वम्महतेक्षत्रायमहतेज्ज्यैष्ठ्यायमहतेजानराज्ज्यायेन्द्रस्ये
न्द्रियाय॥इमममुष्ष्यपुत्रममुष्ष्यैपुत्रमस्यैविशऽएषवौमीराजासोमोस्म्मा
कम्ब्राह्मणानाᳬंराजा॥१८॥अपोदेवामधुमतीरगृब्भ्णन्नूर्ज्जस्वतीराज
स्वश्चितानाᳬं॥याभिर्म्मित्रावरुणावब्भ्यषिञ्चन्न्याभिरिन्द्रमनयन्नत्त्य
रातीᳬं॥१९॥पुत्रमिवपितरावश्श्विनोभेन्द्रावथुᳬंकाव्यैर्द्दᳬंसनाभिᳬं॥
यत्त्सुरामंव्यपिबᳬंशचीभिᳬंसरस्वतीत्त्वामघवन्नभिष्णक्॥२०॥
युञ्जानᳫप्प्रथमम्मनस्त्तत्त्वायसवितधियᳬं॥अग्ग्रेज्ज्योतिर्न्निचाय्यपृ
थिव्याऽअद्ध्याभरत्॥२१॥अन्नपतेन्नस्यनोदेह्यनमीवस्यशुष्मिणᳬं

॥ प्रप्प्रंदातारन्तारिषऽऊर्ज्जंन्नोधेहिद्विपदेचतुष्प्पदे ॥ २२ ॥ दृशानो रुक्क्मऽउर्व्याव्यद्यौर्दुर्म्मर्षमायुः श्रियेरुचानः ॥ अग्निरमृतोऽअभ वद्वयोभिर्य्यदेनन्द्यौरजनयत्सुरेताः ॥ २३ ॥ अग्निःप्प्रियेषुधामसुका मोभूतस्यभव्यस्य ॥ सम्प्राडेकोविराजति ॥ २४ ॥ मयिगृह्णाम्यग्ग्रेऽ अग्निः रायस्प्पोषायसुप्प्रजास्त्वायसुवीर्य्याय ॥ मामुदेवताः सचन्ता म् ॥ २५ ॥ इयमुपरिमतिस्तस्यैवाङ्मात्त्याहैमन्तोवाच्च्यःपङ्क्तिहैमन्ती पङ्क्त्यैनिधनवन्निधनवतऽआग्ग्रयणऽआग्ग्रयणात्रिणवत्रयस्त्रिंश शौत्रिणवत्रयस्त्रिंशशाब्भ्याᳪशाक्क्वररैवतेविश्श्वकर्म्मऽऋषिः प्प्रजा

पतिगृहीतयात्त्वयाव्वाचङ्गृह्णामिप्प्रजाब्भ्यौलोकन्ताऽइन्द्रम् ॥ २६ ॥
ध्रुवक्षितिर्द्ध्रुवयोनिर्द्ध्रुवासिद्ध्रुवँय्योनिमासीदसाधुया ॥ उक्ख्यस्य
केतुम्प्रथमञ्जुषाणाश्श्विनाद्ध्वर्य्यूसादयतामिहत्त्वा ॥ २७ ॥ नवविꣳ
शत्त्यास्तुवतव्वनस्प्पतयोसृज्ज्यन्तसोमोधिपतिरासीदेकत्रिꣳशतास्तु
वतप्प्रजाऽअसृज्ज्यन्तयवाश्श्चायवाश्चाधिपतयऽआसँस्त्रयस्त्रिꣳशतास्तु
वतभूतान्न्यशाम्म्यन्प्प्रजापतिः परमेष्ठ्यधिपतिरासील्लोकन्ताऽइन्द्रम्
॥ २८ ॥ अग्ग्नेजातान्प्प्रणुदानः सपत्नान्प्प्रत्त्यजातान्नुदजातवेदः ॥ अधिनो
ब्ब्रूहिसुमनाऽअहेडँस्तवस्यामशर्म्मँस्त्रिवरूथऽउद्ध्वौ ॥ २९ ॥ सहस्त्र

स्यप्प्रतिमासिसहस्रस्योन्मासिसाहस्रोसिसहस्रायत्त्वा ॥ ३० ॥ नमस्ते
रुद्द्रमन्न्यवऽउतोतऽइषवेनमः ॥ बाहुब्भ्यामुततेनमः ॥ ३१ ॥ नमोस्तु
रुद्द्रेब्भ्योयेपृथिव्याँय्येषामन्नमिषवः ॥ तेब्भ्योदशप्प्राचीर्दशदक्षिणा
दशप्प्रतीचीर्दशोदीचीर्दशोद्ध्वाः ॥ तेब्भ्योनमोऽअस्तुतेनोवन्तुतेनो
मृडयन्तुतेयन्द्विष्मोयश्चनोद्द्वेष्टितमेषाञ्जम्भेदद्ध्मः ॥ ३२ ॥ अश्म्न
न्नूर्ज्जम्पर्व्वतेशिश्रियाणामद्ब्भ्यऽओषधीब्भ्योव्वनस्प्पतिब्भ्योऽअधि
सम्भृतम्पयः ॥ तान्नऽइषमूर्ज्जन्धत्तमरुतः सᳫं रराणाऽअश्मँस्तेक्षु
न्मयितऽऊग्गर्यन्द्विष्मस्तन्तेशुगृच्छतु ॥ ३३ ॥ धामन्तेविश्श्वम्भुवनम

धिश्श्रि॒तम॒न्तः स॑मु॒द्रे हृ॒द्य्य॒न्तरायु॑षि ॥ अ॒पामनी॑के सम्मि॒थे यऽआभृ॑तु॒स्त
मँश्श्या॒म॒मधु॑मन्तन्तऽ ऊ॒र्म्मिम् ॥ ३४ ॥ व्वाज॑श्श्च मे प्प्रस॒वश्श्च॑ मे॒ प्प्रय॑ति
श्श्च मे॒ प्प्रसि॑तिश्श्च मे धी॒तिश्श्च॑ मे॒ क्क्रतु॑श्श्च मे॒ स्वर॑श्श्च मे॒ श्श्लोक॑श्श्च मे श्श्र॒
वश्श्च॑ मे॒ श्श्रुति॑श्श्च मे॒ ज्ज्योति॑श्श्च मे॒ स्व॒श्श्च मे य॒ज्ञेन॑ कल्प्पन्ताम् ॥ ३५ ॥
त्वँय्यँविष्ष्णु॑ दा॒शुषो॒ नॄँ॒ पा॒हि शृ॑णु॒धी गिर॑ः ॥ रक्क्षा॑ तो॒कमु॒त त्क्मना॑ ॥ ३६ ॥
स्वा॒द्द्वीन्त्वा॑ स्वा॒दुना॑ ती॒व्व्रान्ती॒व्व्रेणा॒मृता॑म॒मृतै॑न ॥ मधु॑मती॒म्मधु॑मता सृ॒जा
मि॒ स॒ꣳसोमे॑न ॥ सोमो॑स्य॒श्श्विब्भ्या॒म्पच्च्य॑स्व॒ सर॑स्वत्त्यै पच्च्य॒स्वेन्द्रा॑य सु
त्रा॒म्म्णे॑ पच्च्यस्व ॥ ३७ ॥ तेज॑ः पशू॒नाꣳ ह॒विरि॑न्द्रि॒याव॑त्त्परि॒स्त्रु॒ता॒ पय॑सा

सारघम्मधु॥अश्श्विब्भ्यान्दुग्धम्भिषजासरस्वत्त्यासुतासुताब्भ्यामम्
तꣳसोमऽइन्दुः॥३८॥क्षत्रस्ययोनिरसिक्षत्रस्यनाभिरसि॥मात्त्वाहिꣳ
सीन्मामाहिꣳसीः॥३९॥अश्श्विनापिबताम्मधुसरस्वत्त्यासजोषसा॥
इन्द्रःसुत्रामावृत्रहाजुषताꣳसोम्म्यम्मधु॥४०॥ॐ इमम्मेव्वरुणश्श्रुधी
हवमद्द्याचमृडय॥त्वामवस्युराचके॥४१॥त्वामद्यऽऋषऽआर्षेयऽ
ऋषीणान्नपादवृणीतायँय्यजमानोबहुब्भ्यऽआसङ्गतेब्भ्यऽएषमेदेवेषु
व्वसुव्वार्य्यायक्ष्यतऽइतितायादेवादैव्वदानान्यदुस्तान्यस्म्माऽआचशा
स्वाचगुरस्वेषितश्श्चहोतरसिभद्द्रवाच्च्यायप्प्रेषितोमानुषꣳसूक्तवाका

यसूक्त्काब्ब्रूहि ॥ ४२ ॥ तेजोसिशुक्क्रमृतमायुष्प्पाऽआयुर्म्मेपाहि ॥
देवस्यत्त्वासवितुः प्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्ष्णोहस्त्ताब्भ्यामाददे
॥ ४३ ॥ एकस्म्मैस्वाहाद्द्वाब्भ्याᳬस्वाहाशतायस्वाहैकशतायस्वाहा
व्युष्ट्यैस्वाहास्वर्ग्गायस्वाहा ॥ ४४ ॥ हिरण्ण्यगर्ब्भः समवर्त्ततागग्रेभूतस्य
जातः पतिरेकऽआसीत् ॥ सदाधारपृथिवीन्द्यामुतेमाङ्कस्म्मैदेवायहविषा
विधेम ॥ ४५ ॥ प्रजापतेनत्त्वदेतान्न्यन्न्योविश्श्वारूपाणिपरिताबभूव ॥
यत्त्कामास्त्तेजुहुमस्त्तन्नोऽअस्त्तुवयᳬस्यामपतयोरयीणाम् ॥ ४६ ॥
अश्श्वस्तूपरोगोमृगस्त्तेप्प्राजापत्त्याः कृष्ष्णग्ग्रीवऽआग्ग्नेयोरराटेपु

रस्त्तात्त्सारस्वतीमेष्ष्युधस्त्ताद्धन्न्वोराश्श्विनावधोरामौबाह्वोः सौमा
पौष्ष्णः श्यामोनाब्भ्याᳫं सौर्य्ययामौ श्श्वेतश्श्चकृष्ष्णश्श्चपार्श्श्वयौ
स्त्वाष्ट्रौलोमशसक्त्थौसक्थ्योर्व्वायव्यः श्वेतः पुच्छऽइन्द्रायस्वपस्या
यव्वेहद्दैष्ष्णवोव्वामनः ॥ ४७ ॥ खड्ड्गोव्वैश्श्वदेवः श्वाकृष्ष्णः कर्ण्णो
गर्द्दभस्त्तरक्षुस्त्तेरक्षसामिन्द्रायसूकरः सिᳫंहोमारुतः कृकलासः पिप्प्
काशकुनिस्त्तेशरव्यायैव्विश्श्वेषान्देवानाम्पृषतः ॥ ४८ ॥ शादन्दद्भिरव
कान्दन्तमूलैर्म्मृदम्बर्स्वैस्त्तेगान्दᳫंष्ट्राब्भ्याᳫं सरस्वत्त्याऽअग्ग्रजिह्व
ञ्जिह्वायाऽउत्त्सादमवक्क्रन्देनतालुव्वाजᳫं हनुब्भ्यामपऽआस्स्येनव्वृषण

माण्डाब्भ्यामादित्त्याँश्श्मश्श्रुभिः पन्थानम्भ्रूब्भ्यान्द्यावापृथिवीव्वर्तो
ब्भ्यांव्विद्युतङ्कनीनकाब्भ्याॐ शुक्लायस्वाहाकृष्णायस्वाहापार्य्याी
णिपक्ष्माण्यवार्य्याऽइक्क्षवोवार्य्याणिपक्ष्माणिपार्य्याऽइक्क्षवः ।४९।
अग्ग्नेत्त्वन्नोऽअन्तमऽउतत्त्राताशिवोभवावरूत्थ्यः ॥ वसुरग्ग्निर्व्वसुश्श्र
वाऽअच्छानक्षिद्युमत्तमॅ रयिन्दाः ॥ तन्त्वाशोचिष्ठदीदिवः सुम्म्ना
यनूनमीमहेसखिब्भ्यः ॥५०॥ अग्ग्निश्च्पृथिवीचसन्नतेतेमेसन्नमताम्
दोव्वायुश्चान्तरिक्क्षञ्चसन्नतेतेमेसन्नमतामदऽआदित्त्यश्चद्यौश्चसन्न
तेतेमेसन्नमतामदऽआपश्चव्वरुणश्चसन्नतेतेमेसन्नमतामदः ॥ सप्तसꣳ

सदौऽअष्टमीभूतसाधनी ॥ सकामाँ२ ॥ ऽअद्ध्वनस्कुरुसँज्ञानमस्तुमे
मुना ॥ ५१ ॥ रक्क्षोहाव्विश्श्वचर्षणिरभियोनिमयोहते ॥ द्रोणेसधस्त्थमा
संदत् ॥ ५२ ॥ समास्त्वाग्नऽऋतवोव्वर्द्धयन्तुसंव्वत्सराऽऋषयोयानि
सत्त्या ॥ सन्दिव्येनदीदिहिरोचनेनव्विश्श्वाऽआभाहिप्प्रदिशश्चतस्त्रः
॥ ५३ ॥ संव्वत्सरोसिपरिवत्सरोसीदावत्सरोसीद्वत्सरोसीव्वत्सरोसि ॥
उषसस्तेकल्प्पन्तामहोरात्रास्तेकल्प्पन्तामर्द्धमासास्तेकल्प्पन्ताम्मा
सास्तेकल्प्पन्तामृतवस्तेकल्प्पन्ताꣳसंव्वत्सरस्तेकल्प्पताम् ॥ प्रेत्त्याऽ
एत्त्यैसञ्चाञ्चप्प्रचसारय ॥ सुपर्ण्णचिदसितयादेवतयाङ्गिरस्वद्ध्रुवःसीद

॥५४॥ होतायक्षत्त्समिधेन्द्रमिडस्प्पदेनाभापृथिव्व्या ऽअधि ॥ दिवो वर्ष्मन्त्समिद्ध्यतऽओजिष्ठश्चर्षणीसहांवेत्त्वाज्ज्यस्यहोतर्य्यज ॥५५॥ अग्निमद्द्यहोतारमवृणीतायँय्यजमानः पचन्पक्क्तीः पचन्पुरोडाशम्बध्नन्निन्द्रायच्छागम् ॥ सूपस्त्था ऽअद्द्यदेवोवनस्प्पतिरभवदिन्द्रायव्वयोधसेच्छागेन ॥ अघत्तम्मेदस्तः प्प्रतिपचताग्ग्रभीदवीवृधत्पुरोडाशेन ॥ त्वामद्द्य ऽऋषे ॥५६॥ समिद्धो ऽअग्निन्कृदरम्मतीनाङ्घृतमग्ग्नेमधुमत्त्पिन्वमानः ॥ व्वाजीव्वहन्व्वाजिनञ्जातवेदोदेवानांव्वक्षिप्प्रियमासधस्त्थम् ॥५७॥ अग्ग्नयेगायत्त्रायत्रिवृतेराथन्तरायाष्ष्टाकपाल ऽ

इन्द्रायत्रैष्टुभायपञ्चदशायबार्हतायैकादशकपालोविश्श्वैब्भ्योदेवेब्भ्यो
जागतेब्भ्यःसप्तदशेब्भ्योवैरूपेब्भ्योद्द्वादशकपालोमित्रावरुणाब्भ्या
मानुष्टुभाब्भ्यामेकविंशाब्भ्यांवैराजाब्भ्याम्पयस्याबृहस्प्पतयेपाङ्क्ताय
त्रिणवायशाक्क्वरायचरुःसवित्रऽऔष्णिहायत्रयस्त्रिंशायरैवताय
द्द्वादशकपालःप्प्राजापत्त्यश्श्चरुरदित्त्यैविष्णुपत्क्यैचरुरग्नयेवैश्श्वा
नरायद्द्वादशकपालोनुमत्त्याऽअष्टाकपालः ॥५८॥ देवसवितःप्प्रसुव
यज्ञम्प्रसुवयज्ञपतिम्भगाय ॥ दिव्योगन्धर्वःकेतपूःकेतन्नःपुनातुवाच
स्प्पतिर्वाचन्नःस्वदतु ॥५९॥ अथैतानष्टौविरूपानालभतेतिदीर्घञ्चाति

ह्रस्वँश्चातिंस्त्थूलँश्चातिकृशँश्चातिशुक्क्लँश्चातिकृष्ष्णँश्चातिकुल्ल्वँ
श्चातिलोमशँश्च ॥ अशूद्द्राऽअब्ब्राह्मणास्त्तेप्प्राजापत्त्याः ॥ मागधः
पुँश्चलीकितवः क्क्लीबोशूद्द्राऽअब्ब्राह्मणास्त्तेप्प्राजापत्त्याः ॥ ६० ॥
सहस्त्रशीर्षापुरुषः सहस्त्राक्षः सहस्त्रपात् ॥ सभूमिँ सर्व्वतस्पृत्त्वात्त्य
तिष्ठद्दशाङ्गुलम् ॥ ६१ ॥ श्रीश्च्चतेलक्ष्मीश्चपत्क्न्यावहोरात्त्रेपार्श्वेनक्ष
त्राणिरूपमश्श्विनौव्यात्तम् ॥ इष्ष्णन्निषाणामुम्मऽइषाणसर्व्वलोकम्मऽ
इषाण ॥ ६२ ॥ तदेवाग्ग्निस्त्तदादित्त्यस्त्तद्द्वायुस्त्तदुचन्द्रमाः ॥ तदेवशु
क्क्रन्तद्द्ब्रह्मताऽआपः सप्प्रजापतिः ॥ ६३ ॥ इदम्मेब्ब्रह्मंचक्षत्त्रञ्चो

भेश्श्रियमश्श्नुताम् ॥ मयिदेवादधतुश्श्रियमुत्तमान्तस्यैतेस्वाहा ॥ ६४ ॥
अस्याजरासोदमामरित्राऽअर्च्चद्धूमासोऽअग्नयः पावकाः ॥ श्वितीचयः
श्श्वात्रासौभुरण्ण्यवौवनर्षदौवायवोनसोमाः ॥ ६५ ॥ अस्येदिन्द्रौवावृधे
वृष्ण्णयंशवोमदेसुतस्यविष्ण्णवि ॥ अद्यातमस्यमहिमानमायवोनुष्टु
वन्तिपूर्व्वथा ॥ इमाऽउत्त्वायस्यायमयंसहस्रमूर्द्धवऽऊषुणः ॥ ६६ ॥
यज्जाग्ग्रतोदूरमुदैतिदैवन्तदुसुप्तस्यतथैवैति ॥ दूरङ्गमञ्ज्योतिषाञ्ज्योति
रेकन्तन्मेमनः शिवसङ्कल्प्पमस्तु ॥ ६७ ॥ ब्रह्मणस्प्पतेत्त्वमस्ययन्ता
सूक्तस्यबोधितनयञ्चजिन्व ॥ विश्श्वन्तद्भद्रँय्यदवन्तिदेवाबृहद्वदे

मव्विदथैसुवीरा॑ः ॥ यऽइमाव्विश्श्वाव्विश्श्वकर्म्मायोनः पितान्नपतेन्नस्यनो
देहि ॥ ६८ ॥ अपेतोयन्तुपणयोसुम्नादेवपीयवः ॥ अस्यलोकःसुताव
तः ॥ द्युभिरहोभिरक्तुभिर्व्यक्तँय्यमोदददात्ववसानमस्मै ॥ ६९ ॥
अस्म्मात्त्वमधिजातोसित्त्वदयञ्जायताम्पुनः ॥ असौस्वर्ग्गायलोकाय
स्वाहा ॥ ७० ॥ ऋचंव्वाचम्प्रपद्द्येमनोयजुः प्प्रपद्द्येसामप्प्राणम्प्रपद्द्ये
चक्क्षुः श्रोत्त्रम्प्रपद्द्ये ॥ व्वागोजः सहौजोमयिप्प्राणापानौ ॥ ७१ ॥ तच्च
क्क्षुर्द्देवहितम्पुरस्त्ताच्छुक्क्रमुच्चरत् ॥ पश्श्येमशरदःशतञ्जीवेमशरदः
शतꣳश्शृणुयामशरदःशतम्प्रब्ब्रवामशरदःशतमदीनाःस्यामशरदः

शतम्भूयश्च्चशरदः शतात् ॥७२॥ देवस्यत्वासवितुः प्प्रसवेश्विनोर्ब्बा
हुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥आददेनारिरसि ॥७३॥अहः केतुनाजु
षताᳬसुज्ज्योतिज्ज्योतिषास्वाहा॥ रात्रिः केतुनाजुषताᳬसुज्ज्योति
ज्ज्योतिषास्वाहा ॥७४॥ देवस्यत्वासवितुः प्प्रसवेश्विनोर्ब्बाहुब्भ्या
म्पूष्णोहस्ताब्भ्याम् ॥आददेदित्यैरास्नासि ॥७५॥ पयसोरेतऽआभृ
तन्तस्यदोहमशीमह्युत्तरामुत्तराᳬसमाम्॥ त्विषः संवृक्त्वेदक्षस्यते
सुषुम्मणस्यतेसुषुम्मणाग्गृहुतः ॥इन्द्रपीतस्यप्प्रजापतिभक्षितस्यमधु
मतऽउपहूतऽउपहूतस्यभक्षयामि ॥७६ ॥स्वाहाप्प्राणेब्भ्यः साधिपति

केब्भ्यः ॥ पृथिव्यैस्वाहाग्नयेस्वाहान्तरिक्षायस्वाहाव्वायवेस्वाहा ॥
दिवेस्वाहासूर्य्यायस्वाहा ॥ ७७ ॥ यमायस्वाहान्तकायस्वाहामृत्यवे
स्वाहा ॥ ब्रह्मणेस्वाहाब्ब्रह्महत्यायैस्वाहाव्विश्श्वेब्भ्योदेवेब्भ्यःस्वाहा
द्यावापृथिवीब्भ्याᳬंस्वाहा ॥ ७८ ॥ ॐ ईशावास्यमिदᳬंसर्व्वंय्यत्कि
ञ्चजगत्यांजगत् ॥ तेनत्यक्तेनभुञ्जीथामागृधःकस्यस्विद्धनम् ॥ ७९ ॥
हिरण्मयेनपात्रेणसत्यस्यापिहितम्मुखम् ॥ योसावादित्येपुरुषःसो
सावहम् ॥ ॐ खम्ब्रह्म ॥ ८० ॥

नाममन्त्रैरावाहितस्थापितनवग्रहसहित रुद्रस्य दशांश हवनं कुर्यात् ।

सङ्कल्पः – आवाहितस्थापितदेवतानां पञ्चोपचारैरुत्तरपूजनं करिष्ये ।

उत्तरपूजा– अद्भ्यः सम्भृतः पृथिव्यै रसाच्च विश्वकर्म्मणः समवर्त्तताग्ग्रे॥ तस्य त्वष्टा विदधद्रूपमेति तन्मर्त्त्यस्य देवत्त्वमाजानमग्ग्रे ॥१॥ वेदाहमेतम्पुरुषम्महान्तमादित्त्यवर्ण्णन्तमसः परस्तात् ॥ तमेव विदित्त्वाति मृत्त्युमेति नान्न्यः पन्था विद्द्यतेऽयनाय ॥२॥ प्रजापतिश्चरति गर्ब्भेऽअन्तरजायमानो बहुधा विजायते ॥ तस्य योनिम्परिपश्श्यन्ति धीरास्तस्मिन्ह तस्त्थुर्ब्भुवनानि विश्श्वा ॥३॥ यो देवेब्भ्य ऽआतपति यो देवानाम्पुरोहितः ॥ पूर्व्वो यो देवेब्भ्यो जातो नमो रुचाय ब्राह्मये ॥४॥ रुचम्ब्राह्मञ्जनयन्तो देवाऽअग्ग्रे तदब्ब्रुवन् ॥ यस्त्वैवम्ब्राह्मणो विद्द्यात्तस्य देवाऽअसन्वशे ॥५॥ श्रीश्च ते लक्ष्मीश्च पत्क्न्यावहोरात्रे पार्श्वे नक्षत्राणि रूपमश्श्विनौ व्यात्तम् ॥ इष्णन्निषाणामुम्मऽइषाण सर्व्वलोकम्मऽइषाण ॥६॥

कर्पूरार्तिक्यम्– कदलीगर्भसम्भूतं कर्पूरञ्च प्रदीपितम् । आरार्तिक्यमहं कुर्वे पश्य मे वरदो भव ॥

नीराजनम्– ॐ अग्ग्निर्ज्ज्योतिर्ज्ज्योतिरग्ग्निः स्वाहा सूर्य्यो ज्ज्योतिर्ज्ज्योतिः सूर्य्यः स्वाहा ॥ अग्ग्निर्व्वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा सूर्य्यो वर्च्चो ज्ज्योतिर्व्वर्च्चः स्वाहा ॥ ज्योतिः सूर्य्यः सूर्य्यो ज्ज्योतिः स्वाहा ॥

प्रदक्षिणा– यानि कानि च पापानि जन्मान्तरकृतानि च । तानि सर्वाणि नश्यन्ति प्रदक्षिण पदे पदे ॥

ॐ येतीर्त्थानिप्प्रचरन्तिसृकाहस्त्तानिषङ्गिणः ॥ तेषांॅ सहस्त्रयोजनेवधन्न्वानितन्मसि ॥

सर्वेषां देवानां आचार्यैः सह प्रदक्षिणां कुर्युः ।

पुष्पाञ्जलिः – ॐ यज्ञेनयज्ञमयजन्तदेवास्त्तानिधर्म्माणिप्प्रथमान्यासन् ॥ तेहनाकम्महिमानः सचन्तयत्रपूर्वेसाद्ध्याःसन्तिदेवाः ॥

ॐ राजाधिराजायप्रसह्यसाहिने । नमोवयंवैश्रवणायकुर्महे । समेकामान्कामकामायमह्यम् । कामेश्वरोवैश्रवणोददातु । कुबेरायवैश्रवणाय । महाराजायनमः । ॐस्वस्ति । साम्राज्यंभौज्यं स्वाराज्यंवैराज्यंपारमेष्ठ्यंराज्यंमाहाराज्यमाधिपत्यमयंसमन्तपर्यायीस्यात्सार्वभौमःसार्वायुष आन्तादापरार्द्धात् ॥ पृथिव्यैसमुद्रपर्यन्तायाएकराडितितदप्येषश्लोकोभिगीतोमरुतःपरिवेष्टारो मरुत्तस्यावसन्गृहे । आविक्षितस्यकामप्रेर्विश्वेदेवाःसभासद इति ॥

नानासुगन्धिपुष्पाणि यथाकालोद्भवानि च । पुष्पाञ्जलिं मया दत्तं गृहाण परमेश्वर ॥

श्रीनवग्रहसहितभवानीशङ्करदेवताभ्यो नमः मन्त्रपुष्पाञ्जलिं समर्पयामि, नमस्करोमि ॥

विशेषार्घम्- ( पूगीफल-गन्धाक्षत-पुष्प-द्रव्यसंयुक्तजलेन )

रक्ष रक्ष महादेव रक्ष त्रैलोक्यरक्षक ॥ भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥

अनेन सफलार्घ्येण फलदोऽस्तु सदा मम ॥

श्रीनवग्रहसहित भवानीशङ्कराभ्यां विशेषार्घं समर्पयामि ॥

पुष्पार्पणम्- ॐ नमः॑शम्भ॒वाय॑। चमयोभ॒वाय॑च॒नमः॑शङ्क॒राय॑चमयस्क॒राय॑च॒नमः॑ शि॒वाय॑चशि॒वत॑राय च ॥

पशुपतीन्दुपतिं धरणीपतिं भुजगलोकपतिं च सतीपतिम् ॥

प्रणत भक्तजनार्तिहरं परं भजत रे मनुजा गिरिजापतिम् ॥१॥

न जनको जननी न च सोदरो न तनयो न च भूरिबलं कुलम् । अवति कोऽपि न कालवशं गतं। भजत० ॥२॥

मुरजडिण्डिमवाद्यविलक्षणं मधुरपञ्चमनादविशारदम् । प्रमथभूतगणैरपि सेवितं। भजत० ॥३॥

शरणदं सुखदं शरणान्वितं शिव शिवेति शिवेति नुतं नृणाम् । अभयदं करुणावरुणालयं। भजत० ॥४॥

नरशिरोरचितं मणिकुण्डलं भुजगहारमुदं वृषभध्वजम् । चितिरजोधवलीकृतविग्रहं। भजत० ॥५॥

मखविनाशकरं शशिशेखरं सततमध्वरवाजिफलप्रदम् । प्रलयदग्धसुरासुरमानवं। भजत० ॥६॥

मदमपास्य चिरं हृदि संस्थितं मरणजन्मजराभयपीडितम् । जगदुदीक्ष्य समीपभयाकुलं। भजत० ॥७॥

हरिविरञ्चिसुराधिपपूजितं यम-जनेश-धनेशनमस्कृतम् । त्रिनयनं भुवनत्रितयाधिपं। भजत० ॥८॥

पशुपतेरिदमष्टकमद्भुतं विरचितं पृथिवीपतिसूरिणा ॥

पठति संश्रृणुते मनुजः सदा शिवपुरीं वसते लभते मुदम् ॥९॥

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात् ॥

करोमि यद्यत्सकलं परस्मै नारायणायेति समर्पयामि ॥१०॥

सदाशिवार्पणमस्तु ॥ इति पुष्पार्पणम् ॥

विशेषारार्तिक्यम्- करुणापारावारं कलिमलपरिहारं कद्रूसुतशयितारं करधृतकह्लारम् ।

घनपटलाभशरीरं कमलोद्भवपितरं कलये विष्णुमुदारं कमलाभर्तारम् ॥

जय देव जय देव जय देव जय केशव हर ॥

गजमुख सवितर्नगतनयेऽहं चरणौ तव कलये जय देव जय देव जय देव० ॥१॥जय०

भूधरजारतिलीलं मङ्गलकरशीलं भुजगेशस्मृतिलीलं भुजगावलिमालम् ॥

भूषाऽकृतिमतिविमलं सन्धृतगाङ्गजलं भूयो नौमि कृपालं भूतेश्वरमतुलम् ॥२॥जय०

विघ्नारण्यहुताशं विहिताऽनयनाशं विपदवनीधरकुलिशं विधृताङ्कुशपाशम् ॥

विजयार्कज्वलिताशं विदलितभवपाशं विनताःस्मो वयमनिशं विद्याविभवेशम् ॥३॥जय०
कश्यपसूनुमुदारं कालिन्दीपितरं कालत्रितयविहारं कामुकमन्दारम् ॥
कारुण्याब्धिमपारं कालानलमदरं कारणतत्त्वविचारं कामय ऊष्मकरम् ॥४॥जय०
निगमैर्नुतपदकमले निहतासुरजाले हस्ते धृतकरवाले निर्जरजनपाले ॥
नितरां कृष्णकृपाले निरवधिगुणलीले निर्जरनुतपदकमले नित्योत्सवशीले ॥५॥जय०

महाबलिम्- माषतण्डुलाद्यन्नं कुङ्कुमादिगन्धरक्तपुष्पादियुतं सदीपं सदक्षिणं क्षेत्रपालाय दद्यात् ।

क्षेत्रपालाय भूत-प्रेत-पिशाच-राक्षस-शाकिनी-वेतालादिपरिवारयुताय इमं बलिं समर्पयामि ।
भो भो क्षेत्रपाल इमं बलिं गृहाण ॥ शूद्रेण ब्राह्मणेन वा चतुष्पथे विसर्जयेत् ॥

# गोदान-विधिः

कर्ता हस्तौ पादौ प्रक्षाल्य शुद्धासने प्राङ्मुखमुपविश्य शिखा बध्नीयात्-

ब्रह्मनामसहस्रेण शिवनामशतेन च । विष्णुनामसहस्रेण शिखाबन्धं करोम्यहम् ॥

आचामेत्- ॐ केशवाय नमः । ॐ नारायणाय नमः । ॐ माधवाय नमः । हस्तप्रक्षालनम्- ॐ गोविन्दाय नमः ।

मार्जनम्- अपवित्रः पवित्रो वा सर्वावस्थां गतोऽपि वा। यः स्मरेत्पुण्डरीकाक्षं सबाह्याभ्यन्तरः शुचिः॥

प्रतिज्ञासङ्कल्पः - गन्धाक्षतयवकुशजलान्यादाय देशकालौ सङ्कीर्त्य एवं गुणविशेषेणविशिष्टायां अद्य पुण्यतिथौ अमुकगोत्रः अमुकशर्माहं मम आत्मनः श्रुतिस्मृतिपुराणोक्तं गोदानकल्पोक्त-फलप्राप्त्यर्थं च मम सैकविंशतिपुरुषैः सह गोरोमसङ्ख्याकयुगावधि-विष्णुलोकप्राप्ति-कामनया श्रीपरमेश्वरप्रीत्यर्थं यथाशक्त्यालङ्कृतगोदानं करिष्ये । तदङ्गतया गणपतिपूजनं ब्राह्मणपूजनं गोपूजनं च करिष्ये ॥

ध्यानावाहनादिमानसोपचारैर्वा अन्योपचारैर्गणपतिं पूजयेत्-

सुमुखश्चैकदन्तश्च कपिलो गजकर्णकः। लम्बोदरश्च विकटो विघ्ननाशो विनायकः॥

गां सवत्सां वत्सरहितां वा यथोपचारैः पूजयेत्- ॐ सोमो॑धे॒नुꣳसोमो॒ऽअर्वन्त॑मा॒शुꣳसोमो॑वी॒रङ्क॑र्म्म॒ण्ण्य॒न्ददाति ॥ सा॒द॒न्न्यं॒विद॒त्थ्य॒ꣳस॒भेयम्पि॑तृ॒श्श्रव॑ण॒ञ्ब्यो॒ददा॑शदस्म्मै॥

हस्ते पुष्पं गृहीत्वा नमस्कारः-

या लक्ष्मीः सर्वभूतानां सर्वदेवव्यवस्थिता। धेनुरूपेण सा देवी मम पापं व्यपोहतु ॥

नमो गोभ्यः श्रीमतीभ्यः सौरभेयीभ्य एव च। नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥

अङ्गपूजा- ॐ ललाटे देव्यै नमः, देवीमावाहयामि पूजयामि। (एवं सर्वत्र)

नासापुटयोः कम्बलाश्वतराभ्यां नमः, कम्बलाश्वतरौ आवाहयामि पूजयामि।

कर्णयोरश्विनीकुमाराभ्यां नमः, अश्विनीकुमारौ०। चक्षुषो शशिभास्कराभ्यां नमः, शशिभास्करौ०। दन्तेषु एकोनपञ्चाशद्वायुभ्यो नमः, वायून्०। जिह्वायां वरुणाय नमः, वरुणं०। हुङ्कारे सरस्वत्यै नमः, सरस्वतीं०। गण्डयोर्मासपक्षाभ्यां नमः, मासपक्षौ०। कुक्ष्योः

सप्तविंशत्यृक्षेभ्यो नमः, ऋक्षान्०। उरसि साध्येभ्यो नमः, साध्यान्०। चतुष्पादेषु धर्माय नमः, धर्म०। जङ्घयोः सायङ्कालाय नमः। ओष्ठयोः सन्ध्याभ्यां नमः। ग्रीवायां इन्द्राय नमः। कण्ठे रुद्रेभ्यो नमः। शृङ्गमूलयोर्ब्रह्मविष्णुभ्यां नमः। शृङ्गाग्रे सर्वतीर्थेभ्यो नमः। शिरोमध्ये महादेवाय नमः। खुरमध्ये गन्धर्वेभ्यो नमः। खुराग्रे पन्नगेभ्यो नमः। पृष्ठे एकादशरुद्रेभ्यो नमः। सर्वसन्धिषु अष्टवसुभ्यो नमः। श्रोणितटे पितृभ्यो नमः। पुच्छलोमसु सूर्यरश्मिभ्यो नमः। मूत्रेषु जाह्नव्यै नमः। गोमये यमुनायै नमः। क्षीरे समुद्रेभ्यो नमः। दधिषु नर्मदायै नमः। सर्पिषु हुताशनायै नमः। रोमकूपेषु त्रयस्त्रिंशत्कोटिदेवताभ्यो नमः। उदरे पृथिव्यै नमः। स्तनेषु चतुःसागरेभ्यो नमः। दक्षिणपार्श्वे कुबेराय नमः। वामपार्श्वे वरुणाय नमः। इति सुवर्णशृङ्गीं ताम्रपृष्ठीं रौप्यखुरीं रत्नपुच्छीं घण्टाचामरदोहन्यादिसहितां गां प्रपूजयेत्।

प्रार्थना- यज्ञसाधनभूता या विश्वस्याघौघनाशिनी। विश्वरूपधरो देवः प्रीयतामनया गवा॥
चतुर्मुखस्य या लक्ष्मीर्या लक्ष्मीर्धनदस्य च। या लक्ष्मीर्लोकपालानां सा धेनुर्वरदास्तु मे॥
साक्षाद्गङ्गा च गोमूत्रे गोमये यमुना तथा। सर्वपापहरा धेनुस्तस्माच्छान्तिं प्रयच्छ मे॥

तर्पणम्- गोपुच्छजलेन आदौ देवतर्पणम्-

आगच्छन्तु महाभागा विश्वेदेवा महाबलाः । ये यत्र विहितास्तत्र सावधाना भवन्तु मे ॥
ब्रह्माद्या देवताः सर्वे ऋषयो मनवस्तथा । असुरा यातुधानाश्च सर्वदेवाधिदेवताः ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणात् ॥
विश्वेदेवास्तथादित्याः सिद्धाश्चैव मरुद्गणाः। पिशाचा गुह्यकाः प्रेता गन्धर्वोरगराक्षसाः॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणात् ॥

यज्ञोपवीतं कण्ठे कृत्वा उदङ्मुखो भूत्वा यवजलेन द्वौ-द्वौ अञ्जलीन्दद्यात्-

सनकः सनन्दनश्चैव तृतीयश्च सनातनः । कपिलश्चासुरिश्चैव वोढुः पञ्चशिखस्तथा ॥
अत्र्यङ्गिराद्यास्तृप्यन्तु गोपुच्छोदकतर्पणात् ॥- २

अपसव्येन मोटकतिलजलान्यादाय दक्षिणाभिमुखस्त्रींस्त्रीनञ्जलीन्दद्यात्-

कव्यवाडनलः सोमो यमश्चैवार्यमा तथा । अग्निष्वात्ताबर्हिषदः सोमपाः पितृदेवताः ॥
ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणात् ॥-3
पिता-पितामहश्चैव तथैव प्रपितामहः । मातामहः प्रमाता च तथा वृद्धप्रमातृकाः ॥

ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणात् ॥- ३

मातामह्यादयः सर्वास्तथैवान्याश्च गोत्रजाः । ताः सर्वास्तृप्तिमायान्तु गोपुच्छोदकतर्पणात् ॥- 3

आब्रह्मस्तम्बपर्यन्तं ये चान्ये गोत्रिणस्तथा । तृप्यन्तु पितरः सर्वे मातृमातामहादयः ॥

ते सर्वे तृप्तिमायान्तु गोपुच्छोदकतर्पणात् ॥- ३ ; त्रिवारं प्रदक्षिणा कुर्यात् ।

गोदानसङ्कल्पः – यवकुशतिलजलान्यादाय गोपुच्छ गृहीत्वा देशकालौ सङ्कीर्त्य-

अमुकगोत्रः अमुकशर्माहं मम समस्तपितॄणां निरतिशयब्रह्मलोकावाप्त्यादिसुखसाधनकाम-नया महाघोरनरकयातनानिवारणार्थं उत्तमलोकप्राप्त्यर्थं ममात्मनः श्रुतिस्मृतिपुराणोक्तफल-प्राप्त्यर्थं इह जन्मनि जन्मान्तरे च कृतकायिकादिसमस्तपापक्षयार्थं आयुरारोग्यै श्वर्यार्थञ्च क्रूरग्रहजन्यजनिष्यमाणसर्वारिष्टकष्टशमनार्थं इमां गां रुद्रदैवतां सुवर्णशृङ्गीं रौप्यखुरीं ताम्र-पृष्ठीं रत्नलाङ्गूलीं घण्टाचामरादियुतां कांस्यदोहनीं वस्त्रद्वयोपेतां श्रीलक्ष्मीनारायणप्रीतये यज्ञसाङ्गतासिद्धये यथानामगोत्राय ब्राह्मणाय तुभ्यं सम्प्रददे ।

ब्राह्मणवचनम्- गृह्णामि सुरभीं देवीं सर्वदेवमयं शुभाम् ।
उभौ कुरु पवित्रौ च उभयोस्तारिका भव ॥

दानप्रतिष्ठा- अद्य कृतैतद्गोदानप्रतिष्ठासिद्धये सुवर्णमग्निदैवताकं रजतं चन्द्रदैवताकं पात्रं विश्वकर्मा-दैवताकं अन्नं प्रजापतिदैवताकं वस्त्रं बृहस्पतिदैवताकं गोदानदानप्रतिष्ठात्वेन तुभ्यमहं सम्प्रददे ।

ग्रहीता- ॐ कोऽदात्कस्माऽअदात्कामोऽदात्कामायादात्॥कामो दाता कामः प्रतिग्रहीता कामैतत्ते॥

नमस्कारः - नमो गोभ्यः श्रीमतीभ्य सौरभेयीभ्य एव च ।
नमो ब्रह्मसुताभ्यश्च पवित्राभ्यो नमो नमः ॥
नमो ब्रह्मण्य देवाय गोब्राह्मणहिताय च । जगद्धिताय कृष्णाय गोविन्दाय नमो नमः ॥

ब्राह्मणं च नत्वा- गोदानप्रतिष्ठार्थं यथाशक्ति ब्राह्मणान् भोजयिष्ये, ताम्बूलदक्षिणाञ्च दातु-महमुत्सृजे । एवं गोदानसाङ्गतासिद्ध्यर्थं यथानामगोत्रेभ्यो भूयसीं दक्षिणां दातुमह-मुत्सृजे । इत्यादि देय-पदार्थान् यथाशक्तिं सङ्कल्प्य-

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु । न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम् ॥
ॐ विष्णवे नमः, ॐ विष्णवे नमः, ॐ विष्णवे नमः । यजमानो हस्ते पुष्पं गृहीत्वा आवाहितदेवतान् विसर्जयेत् । गन्धाक्षतान् पुष्पाणि च विकीर्य ।

क्षमाप्रार्थना-

आवाहनं न जानामि न जानामि विसर्जनम् । पूजां चैव न जानामि क्षमस्व परमेश्वर ॥
अन्यथा शरणं नास्ति त्वमेव शरणं मम । तस्मात्कारुण्यभावेन रक्षस्व परमेश्वर ॥
गतं पापं गतं दुःखं गतं दारिद्र्यमेव च । आगताः सुख सम्पत्तिः पुण्याच्च तव दर्शनात् ॥
यदक्षरपदभ्रष्टं मात्राहीनं च यद्भवेत् । तत्सर्वं क्षम्यतां देव प्रसीद परमेश्वर ॥

कर्ता स्वबन्धुवर्गैः सह सब्राह्मणयज्ञोपरि पुष्पाक्षतानर्पयन् प्रदक्षिणां कुर्यात्-

यानि कानि च पापानि जन्मान्तरकृतानि च । तानि तानि प्रणश्यन्ति प्रदक्षिण पदे पदे ॥
गच्छ गच्छ सुरश्रेष्ठ स्वस्थानं परमेश्वर । यत्र ब्रह्मादयो देवास्तत्र गच्छ सुरेश्वर ॥
पुष्पाक्षतै पीठदेवतां विसर्जयेत् ।

आचार्यादयो ब्राह्मणा ऐशान्यां स्थापितशान्तिकलशजलेन मङ्गलगीत-वाद्यादि पुरःसरं यजमानस्य मङ्गलाभिषेकं कुर्युः -

सुरास्त्वामभिषिञ्चन्तु ब्रह्म-विष्णु-महेश्वराः। वासुदेवो जगन्नाथस्तथा सङ्कर्षणो विभुः ॥
प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते । आखण्डलोऽग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥

वरुणः पवनश्चैव धनाध्यक्षस्तथा शिवः । ब्रह्मणा सहितः शेषो दिक्पालाः पान्तु ते सदा ॥
कीर्तिर्लक्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः। बुद्धिर्लज्जा वपुः शान्तिस्तुष्टिः कान्तिश्च मातरः॥
एतास्त्वामभिषिञ्चन्तु देवपत्न्याः समागताः। आदित्यश्चन्द्रमा भौमो बुधो जीवः सितार्कजौ ॥
ग्रहस्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः । देवदानवगन्धर्वा यक्षराक्षसपन्नगाः॥
ऋषयो मनवो गावो देवमातर एव च । देवपत्न्यो द्रुमा नागाः दैत्याश्चाप्सरसां गणः॥
अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च । ओषधानि च रत्नानि कालस्याऽवयवाश्च ये ॥
सरितः सागराः शैलास्तीर्थानि जलदा नदाः । एते त्वामभिषिञ्चन्तु सर्वकामार्थसिद्धये ॥

ॐ देवस्यत्वासवितुःप्प्रसवेश्श्विनोर्ब्बाहुब्भ्याम्पूष्णोहस्ताब्भ्याम् ॥ अग्ग्नयेजुष्टङ्गृह्णाम्म्यग्ग्नीषोमाब्भ्याञ्जुष्टङ्गृह्णामि ॥ १ ॥ कोसिकतमोसिकस्मैत्त्वाकायत्त्वा ॥ सुश्श्लोकसुमङ्गलसत्त्यराजन् ॥ २ ॥ शिरोमेश्श्रीर्य्यशोमुखन्त्विषिःकेशाश्श्चश्म्मश्श्रूणि ॥ राजामेप्प्राणोऽअमृतꣳसम्म्राट्ट्चक्षुर्व्विराट्ट्श्श्रोत्रम् ॥ ३ ॥ जिह्वामेभद्द्रंव्वाङ्महोमनोमन्न्युःस्वराट्ट्भामः ॥ मोदाःप्प्रमोदाऽअङ्गुलीरङ्गानिमित्रम्मेसहः ॥ ४ ॥ बाहूमेबलमिन्द्रियꣳहस्तौमेकर्म्मवीर्य्यम् ॥ आत्माक्षत्त्रमुरोमम ॥ ५ ॥ पृष्ठीर्म्मेराष्ट्रमुदरमꣳसौग्ग्रीवाश्चश्श्रोणी ॥ ऊरूऽअरत्नीजानुनीविशोमेङ्गानिसर्व्व

तः॥६॥नाभिर्म्मेचित्तंव्विज्ञानम्पायुर्म्मेपचितिर्ब्भसत्॥आनन्दनन्दावाण्डौमेभगःसौभाग्ग्यम्प
सः॥ जङ्घाब्भ्याम्पद्ब्भ्यान्धर्म्मोस्स्मिव्विशिराजाप्प्रतिष्ठितः॥७॥प्रतिक्षत्त्रेप्प्रतितिष्ठामिराष्ट्ट्रेप्प्रत्त्य
श्श्वेषुप्प्रतितिष्ठामिगोषु॥प्प्रत्त्यङ्गेषुप्प्रतितिष्ठाम्म्यात्म्मन्प्प्रतिप्प्राणेषुप्प्रतितिष्ठामिपुष्ट्टेप्प्रतिद्द्यावा
पृथिव्व्योः प्प्रतितिष्ठामियज्ञे॥८॥त्त्रयादेवाऽएकादशत्त्रयस्त्रिꣳशाःसुराधसः॥बृहस्प्पतिपुरोहिता
देवस्यसवितुःसवे॥देवादेवैरवन्तुमा॥९॥प्रथमाद्द्वितीयैर्द्द्वितायास्तृतीयैस्तृतीयाःसत्त्येनसत्त्यँ
य्यज्ञेनयज्ञोयजुर्ब्भिर्य्यजूꣳषिसामभिःसामान्न्यृग्गिभर्ऋचःपुरोनुव्वाक्क्याभिःपुरोनुवाक्क्याय्या
ज्ज्याभिर्य्याज्ज्याव्वषट्ट्कारैर्व्वषट्ट्काराऽआहुतिभिराहुतयोमेकामान्त्समर्द्धयन्तुभूःस्वाहा॥१०॥
द्यौःशान्तिरन्तरिक्क्षꣳशान्तिःपृथिवीशान्तिरापःशान्तिरोषधयःशान्तिः॥व्वनस्प्पतयःशान्ति
र्व्विश्श्वेदेवाःशान्तिर्ब्ब्रह्मशान्तिःसर्व्वꣳशान्तिःशान्तिरेवशान्तिःसामाशान्तिरेधि॥११॥तच्चक्क्षु
र्द्देवहितम्पुरस्त्ताच्छुक्क्रमुच्चरत्॥पश्श्येमशरदःशतञ्जीवेमशरदःशतꣳशृणुयामशरदःशतम्प्रब्ब्र
वामशरदःशतमदीनाःस्यामशरदःशतम्भूयश्चशरदःशतात्॥१२॥ॐस्वस्तिनऽइन्द्रोव्वृद्ध
श्श्रवाःस्वस्तिनः पूषाव्विश्श्ववेदाः॥स्वस्तिनस्ताक्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्प्पतिर्द्दधातु
॥१३॥व्विश्श्वानिदेवसवितर्द्दुरितानिपरासुव॥यद्भद्रन्तन्नऽआसुव॥१४॥

दध्यक्षताभिमन्त्रणम्- ॐ आब्ब्रह्मन्ब्राह्मणोब्ब्रह्मवर्च्चसीजायतामाराष्ट्रेराजन्न्यः शूरऽइषव्व्यो तिव्याधीमहारथोजायतान्दोग्ग्ध्रीधेनुर्वोढानड्वानाशुः सप्प्तिः पुरन्धिर्य्योषाजिष्णूरथेष्ठाः सभेयोयुवास्ययजमानस्यवीरोजायतान्निकामेनिकामेनः पर्ज्जन्न्योवर्षतुफलवत्त्योनऽओषधयः पच्च्यन्ताँय्योगक्षेमोनः कल्प्पताम्॥ १॥

रक्षाबन्धनम्- ॐ त्वँव्यंविष्णुदाशुषोनॄँः पाहिशृणुधीगिरः॥ रक्क्षातोकमुतत्क्मना॥

येन बद्धो बली राजा दानवेन्द्रो महाबलः। तेन त्वां प्रतिबध्नामि रक्षे मा चल मा चल॥

तिलकम्- ॐ त्र्यायुषञ्जमदग्नेः इति ललाटे। ॐ कश्श्यपस्य त्र्यायुषम् इति ग्रीवायाम्। ॐ यद्देवेषु त्र्यायुषम् इति बाहुमूले। ॐ तन्नोऽअस्तुत्र्यायुषम् इति हृदि। ततो यजमान इदं मण्डलाद्युपकरणमाचार्याय प्रतिपादयामीति जलेनोत्सर्गं कुर्यात्।

ॐ प्रमादात् कुर्वतां कर्म प्रच्यवेताध्वरेषु च। स्मरणादेव तद्विष्णोः सम्पूर्णं स्यादिति श्रुतिः॥

यस्य स्मृत्या च नामोक्त्या तपोयज्ञक्रियादिषु। न्यूनं सम्पूर्णतां याति सद्यो वन्दे तमच्युतम्॥

ॐ अच्युताय नमः इति त्रिवारं पठित्वा श्रीमद्भगवन्तं यज्ञपुरुषं लक्ष्मीनारायणं प्रभुं हृदि ध्यात्वा

तच्चरणारविन्दयुगले तत्कर्मफलं समर्पयेत् ।

कुशतिलजलान्यादाय-

कायेन वाचा मनसेन्द्रियैर्वा बुद्ध्यात्मना वा प्रकृतिस्वभावात् ।

करोमि यद्यत् सकलं परस्मै नारायणायेति समर्पयामि ॥ इति ध्यात्वैवोत्सृजेत् ॥

अञ्जलिं बध्वा ब्राह्मणान्प्रार्थयेत्-

मया यत्कृतं कर्मयन्न्यूनातिरिक्तं भवद्वचनात्सर्वं परिपूर्णमस्तु ।

ब्राह्मणः - ॐ अस्तु परिपूर्णम् ।

ब्राह्मणपादौ प्रक्षाल्य पादोदकं गृहीत्वा तान् ब्राह्मणाशिषो गृहीत्वा सुहृद्बन्धुवर्गादिभिः सह सोत्साहो भुञ्जीत ॥

॥ इति नवग्रहजपषडङ्गरुद्री समाप्तः ॥

० इति ०

# ।। नवग्रहजप षडङ्गरुद्री ।।

प्राप्तिस्थान

बाबू माधवप्रसाद शर्मा

के.२३/११९, दूधविनायक

वाराणसी - २२१००१; पो.बॉ.क्र.१००६